ओम
व्र० प०
१

ॐ श्रीगणेशाय नमः ॥ आत्मस्वकृतोद्धृतश्रीरुद्रधरशर्मणा ॥ नानानिबंधसिद्धांतैर्लिख्य
ते व्रतपद्धतिः १ तत्रादौ व्रतसामान्यधर्माः तत्र देवलः अभुक्त्वा प्रातराहारं स्नात्वाचम्य स
माहितः सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत् आहारमभुक्त्वा पूर्णात्पूर्वदिने एकभा
हारं भुक्त्वा तेनाप्ययमर्थः वारद्वयमन्नभोजने व्रतपूर्वदिने अग्रिमदिने प्रातःकाले कृत
स्नानश्चाचांतः सूर्याय देवताभ्यश्च भगवन्सूर्य भगवत्यो देवताग्रयाय तद्व्रतमाचरि
ष्यामीत्यनेन प्रकारेण निवेद्य व्रतं संकल्पं कुर्यादिति तत्रापि प्रकारमाह महाभारते
गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः औदुं
बरं ताम्रमयं भाजनमित्यर्थः यद्वृत्तिनकादिव्रतमिति कल्पतरुः यद्वा संकल्पयेत्ता
म्रपात्राद्यभावे संकल्पमात्रमपि कुर्यादिति समयप्रदीपः भविष्यपुराणे क्षमा सत्यं द
याद्दानं शौचमिंद्रियनिग्रहः देवपूजाग्निहवनं संतोषोऽस्तेयवर्जनं सर्वव्रतेष्वयं धर्मः

राम
१

सूतेनेतियावत् अत्ययेविनाशेसंभाव्यमानइत्यर्थः भविष्यपुराणे तस्मात्कृतोपवासेनस्नानम
भ्यंगश्चैवके वर्जनीयंप्रयत्नेन तृप्यदेततपरंन्य दृष्टुमाताताय: उपवासंद्विजःकृत्वा
ततोब्राह्मणभोजनं कारयेत्तेनसम्यग्उपवासोस्यजायते सम्पूर्णः प्रकृष्टफलइत्यर्थः
द्विजइतिकर्त्तमात्रोपलक्षणं व्रतेचसर्ववर्णानांस्त्रीणांचाधिकारः विशेषाश्चवामन
उपवासस्तुसाग्नेः ब्रह्मचारिणस्तुनिषिद्धः तथाहि अनड्वान्ब्रह्मचारीचआहिताग्नि
श्चतेत्रयः अश्नंतएवसिद्ध्यंतिनैषांसिद्धिरनश्नतां स्त्रीणांसभर्तृकाणांपत्तिपार्थ्ये
केनोपवासोनिषिद्धः तथाचविष्णुपुराणे पत्यौजीवतियानारी उपोष्यव्रतमाचरेत्
आयुःसाहरतेभर्तुर्नरकंचैवगच्छति भर्तुःसमानव्रतचारित्वमिति विष्णुवचनात् भ
र्त्रासहितत्वेनोपवासे नदोषः पत्यनुमत्यापृथगप्युपवासेदोषाभावः कामंभर्तुरनु
ज्ञातापिव्रतोपवासनियमेज्याभ्यासइति शंखलिखितवाक्यात् वैष्णवश्चद्वयोस्तिथि
रात्रौपंचरात्रोपवासनिषेधः वैष्णवाःशूद्राश्चयेमोहादुपवासंप्रकुर्वते त्रिरात्रंपंच

यस्तु वासो गुणैः सह उपवासः स विज्ञेयः सर्वभोगविव
र्जितः उपावृत्तस्य दोषेभ्यो० निवृत्तस्य

सामान्योद्दिष्टधात्वर्थः इन्द्रियनिग्रहो ऽध्यपसर्पोदिनिवृत्तिः देवपूजा यत्पदेऽस्य व्रतं तत्
सदैवस्य पूजा सामान्यवृत्तेऽस्तु देवतापूजाऽपि हवनमपि पूज्यदेवतोद्देशप्रक्रमादित्विस
मयप्रदीपः तच्च स्वगृह्यप्रकारेणाकर्तव्यः तत्र उपवासादिव्रते प्रधानानिरोधात्संग्रव
प्राधान्याधः होमपूजामाज्यं सर्वत्र्याचायो नरशते अग्निहोत्रे वेदे पञ्चव्रते विशिष्टविहि
ते तत्रैव ज्ञेयं एकादश्यादिपूर्णिमानां होमानाचरणान्नु सर्वपरस्यावश्यं संकोचात्
उपवासस्वरूपनिरूपणेन उपवासधर्मानाह भविष्यपुराणे उपावृत्तस्य दोषेभ्यो रागद्वे
वे॰ षादिभ्यः संभोगविवर्जितः नैत्याभ्यंगादिभोगशून्यः भोगविशेषदोषाभावमाह
शातातपः गन्धालंकारवस्त्राणि पुष्पगन्धानुलेपनं उपवासे न दुष्यन्ति दन्तधावनमंजनं
दन्तधावनमत्र तृणादिना काष्ठसंयोगस्य व्रते निषेधात् तथाहि उपवासे तथा श्राद्धे
न खादेद्दन्तधावनं दन्तानां काष्ठसंयोगो हन्त्यासप्तमं कुलं देवलः उपवासः प्रणा
श्यते दिवास्वप्नान्मैथुनैः अत्यम्बुपानाच्च सोपवासः प्रणश्यति अष्टैः पाशकैः

सैमहाघोरेहन्ति पुण्यं पुराकृतं यत्रोभयत्रदिने तिथिरस्ति तत्र द्वितीयातृतीययोश्चतुर्थी
पंचम्योः षष्ठीसप्तम्योः अष्टमीनवम्योः एकादशीद्वादश्योः चतुर्दशीपूर्णिमास्योः
अमावास्याप्रतिपदोर्युग्मं प्रशस्तं द्वितीयातृतीयामिश्राग्राह्या न प्रतिपन्मिश्रा तृती
याव्रते द्वितीयामिश्राग्राह्या च चतुर्थीमिश्रा एवमग्रेपि षष्ठ्यष्टम्यामावास्या कृष्णा
चैव चतुर्दशी एताः परयुता उपोष्याः पराः पूर्वेणासंयुताः पराः सप्तम्यादयः एवका
मविद्धेद्दरः स्कन्द इति च एकादश्यां तु यदा दशमीमिश्रैव एकादश्यग्रिमदिवसे
नवर्द्धते तदा दशमीमिश्रैवग्राह्या ये तु एवंविधविषयके वलद्वादश्येवोपवासनी
या एकादश्यादशाविद्धापरतो न च वर्द्धते एकादशीपरित्यज्य द्वादशीमुपवासये
त् इति वाक्यादाहुः तन्न एतद्वाक्यस्याऽप्रमाणकत्वात् रात्रिव्रते रात्रियोग एव प्रयो
जकः नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते इति वचनात् पर्वादिषु तैला ५

सः यावत्किंचिद्दिवसस्त्रिंशद्दिवसात्मकः सावनः रविसंक्रान्तिव्यवस्थितः सौरः कृष्णादिरपि
मासश्चान्द्र एव तेषु व्रतादौ सामान्यतश्चान्द्र एव शुक्लादिर्मुख्यः इन्द्राग्नी यत्र हूयेते मासा-
दिः स प्रकीर्तितः अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ इति सामान्यतो मासल-
क्षणं तेन चैत्रादिमासोल्लेखेऽपि व्रते शुक्लादि चैव मासादिपरिग्रह इति समयप्रदीपः मा-
घस्नानादौ विवाहादौ च मकरस्थादित्ये तेनैव विधिः तेन तत्र सौरपरिग्रहः माघोऽपि वा
सादौ तु चैत्रादौ कृत्स्ने वाश्वसावनो मासेति अथ भाद्रपदे मासि कृष्णाष्टम्यामित्यादौ ग्रन्थ-
पुरुकृत्स्नपद्धत्यादौ च वाक्यान्तरपर्यालोचनया कृष्णादिश्चान्द्रमासः तथाचोक्तं वि-
वाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः पैत्र्ये कर्मणि चान्द्रः स्यादेवं मासकृतो विधिः
अथ तिथिव्यवस्था तत्र गौडाः युग्माग्निकृतभूतानि षण्मुन्योर्वसुरंध्रयोः रुद्रेण
द्वादशी युक्ता चतुर्दश्याथ पूर्णिमा प्रतिपदा त्वमावस्या तिथ्योर्युग्मं महाफलं एतद्व्या

३ नादिस्वयमेवकुर्यात् इतियोगीश्वरः बौधायनः होमदेवार्चनाद्यासु क्रियास्वाचमने
तथा नैकवस्त्रः प्रवर्तेत द्विजो वाचिनिके जपे इयं च द्विवस्त्रतास्त्रीणामपि विशेषा
श्रवणात् वाक्यांतराच्च तथाच हरिवंशे उमारुंधतीसंवादे शुक्लमेव सदावासः
प्रशस्तं चंद्रसंभवे अंतरवासोपरं चैव उपवासव्रते तथा अत्र चंद्रसंभवेत्यरुंध
त्याः संबोधनपदं व्यासः आर्द्रवासास्तु यः कुर्याज्जपहोमसुरार्चने सर्वं तद्राक्षसं
विद्याद्बहिर्जानुचयत्कृतं शंखायनः स्नानमाचमनं होमं स्वाध्यायं देवतार्चनं प्रौढ
पादो न कुर्वीत स्वाध्यायं पितृतर्पणं आसनारूढपादस्तु जानुनोर्जंघयोस्तथा कृताव
सक्थिकोयस्तु प्रौढपादः स उच्यते अत्र धर्मकार्ये त्रयो मासाः चांद्रसौरसावनाः त
त्र ज्योतिःशास्त्रे दर्शाद्दर्शश्चांद्रस्त्रिंशद्दिवसस्तु सावनो मासः रविसंक्रांतिस्तु विज्ञः
सौरोपि निगद्यते सद्भिः दर्शानंतरमशुक्लप्रतिपदमारभ्य पश्चमावास्यापर्यंतं चांद्रोमा एम ३

गत्वेवान्तेषोऽशुद्धिर्नविद्यते इतिवाक्यात् शुद्धिर्व्रतफलं व्रतंचगृहीत्वापालनीयं यदाह
छागलेयः पूर्वंव्रतंगृहीत्वायोनाचरेत्काममोहितः जीवन्भवतिचाण्डालोमृतःश्वा
चाभिजायते अत्रकाममोहितइति कामकृतपरित्यागेदोषमाह यदितुप्रमादादिना
परित्यागस्तदानदोषः तथाचाह देवलः सर्वभूतभयंव्याधिःप्रमादोगुरुशासनं
अव्रतघ्नानिकथ्यन्ते सकृदेतानिशास्त्रतः सर्वभूतभयंव्याघ्रादिजंतुभ्योभयं व्या
धिर्व्रतप्रतिबंधकम: प्रमादोविस्मरणं गुरुशासनंगुरोराज्ञा सकृदित्यभिधा
नादेतैरपिएकवारपरित्यागेनदोषः पुनःपुनःपरित्यागेनदोषः एवंसूतकमृत
कयोरपिव्रतंनत्याज्यं नव्रतिनांव्रतमितिविष्णुवचनात् व्रतिनामारब्धव्रतानांसूतक
मृतकयोर्दोषोनास्तीत्यर्थः स्त्रीशुव्रतमारब्धेअंतरारजोदोषेअन्यद्वारापूजाकार
येत् यदाचस्पृष्टा तदान्यनैनकारयेत् इतिमत्स्यपुराणवचनात् कायिकमुपवा

कंकेन्दुके नरुत्त लवणे सैंधवसामुद्रेणक्षेचदधिसर्पिषी पयोनुद्धृतसारंच चपनसाम्रहरी
तकी पिप्पलीजीरकश्रीवनागरंगंचतिंतिडी कदलीलवलीधात्रीफलान्यगुडमैक्षवं च तैल
पक्वेन्दुनयोर्हविष्यान्नं प्रचक्षते केन्दुके इक्षुकंद विशेषः धात्री आमलकी [illegible] यथोक्तानि
भविष्यपुराणे पञ्चाधिक दिने भक्त्या भानुं संपूज्य श्रद्धया नक्तं करोति पुरुषः स याति परमं लोक
नै॰ तं तत्र पूर्वेद्युः निरामिषमेकवारं भुक्त्वा अग्रिमदिने प्रातःकाले स्नात्वा पुष्पलाक्षतगुडैर्विधा
यसूर्याय कृते ईशान्याभिमुखस्ताम्रपात्रं वारिपूर्णमादाय जानुभ्यामवनीं गत्वा ॐ भगव वृ॰
न्सूर्य भगवत्योदेवता अस्यादिरपदिनेन नक्तं तत्र कालं भोजननिवृत्तिव्रतमहमाचरिष्ये नक्तं
चात्र द्विगुणाच्छायायां नक्तदिनक्षेपः। अत्राग्निकार्यं नक्तव्रतत्त्वेन भमपि न कुर्वीत सदाचारः
भक्तिश्रद्धे चात्रांगं भक्तिरूपासत्वेन तानमिदमेव तिष्ठतीति श्रद्धा अग्निरपउवाच योनक्तमेकं
प्रकुर्वीत नक्तं मम तद्दिने नरः ब्रह्मचारी जितक्रोधी ममार्चनपरः क्षमा [illegible] मानान्

नै

दिनिषेधे तत्तिथिवारावच्छिन्न एव कालः प्रयोजकः निषिद्धकालवर्जनमिति वचनात् अ
थ नक्तव्यवस्था नक्षत्रदर्शनान्नक्तं केचिदिच्छन्ति मानवाः मुहूर्त्तोनं दिनं केचित्प्रवदन्ति मनीषि
णः नक्षत्रदर्शनान्नक्तमहं मन्ये नराधिप अत्र नक्षत्रदर्शनान्नक्तं सामान्यव्रतविषयं मुहूर्त्तो
नदिनं सौरव्रते मुहूर्त्तोनदिनं दिनस्य पञ्चदशो विभागः तथा च नरसिंहपुराणे आत्मनो द्वि
गुणच्छायां यदा सन्तिष्ठते रविः सौरं नक्तं विजानीयान्न नक्तं निशि भोजनं अथ नक्तनियमाः
भविष्यपुराणे हविष्यभोजनं स्नानं सत्यमाहारलाघवं अग्निकार्य्यमधःशय्यां नक्तभोजी
षडाचरेत् हविष्येषु यवा मुख्यास्तदनु व्रीहयो मताः माषकोद्रवगौरादीन् सर्वालाभेऽपि व
र्जयेत् वर्षप्रदीपे हविष्येषु प्रथमं यवास्तदलाभे व्रीहयस्तदलाभे माषकोद्रवचणकव
नकोद्रवगौरसर्षपमसूरचीनककुलत्थवर्जमन्यदप्यन्नं तथा हैमन्तिकं सितास्विन्नधा
न्यं मुद्गास्तिला यवाः कलायकङ्गुनीवारं वास्तूकं हिलमोचिका षष्टिका कालशाकं च मूल

यु.प.
६

वीरेयद्वाऽऽरुत्वं भवेद्धै भगदैवतं सवरोरोगमहाप्रोक्तः सर्वरोगभयापहः योऽत्र संप्रकुर्वेत्स्नानं
भगदैवाम्बुलेपने । सर्वरोगविनिर्मुक्तोपातिसन्त्यायतेगृहे भगदैवत्तमुत्तरफाल्गुनीन
क्षत्रयुक्ते रविवारे ॐ सर्वरोगविनिर्मुक्तोपातिसंन्त्यायतेगृहे गमनकामो भानुपूजनं व्रत
महं करिष्ये संज्ञापतिः सूर्यः उभयसप्तमीव्रते आदित्य उवाच सप्तम्यामथवा षष्ठ्यां
द्वयोरुभयोरपि योऽश्नेकनक्तभोजी नियतात्मा जितेन्द्रियः यत्पुण्यं परमं प्रोक्तं सप्ततंत्र
त्रयाजिनां सत्यवादिषु यत्पुण्यं यत्पुण्यम् तु गामिनां तत्फलं सकलं प्राप्य ममलोकमुपै
तिसः । तत्र माघमास सप्तम्यां प्रातः काले कृतस्नानादि राचांतः तोयपूर्णपात्रमा
दाय पूर्ववत् कृतं निवेद्य ॐ सप्ततन्त्रयाजिपरमपुण्यसत्यवादिपुण्यपत्नीगामिपुण्य
समपुण्यप्राप्तिपूर्वकादित्यलोकगमनकामो द्याद्विवर्षं यावदुभयपक्षसप्तम्यां नक्तै
तरकालभोजननिवृत्तिव्रतमहं करिष्ये एवमुभयषष्ठ्योरपि नक्तव्रते तत्र वाक्ये षष्ठ्यो शम
६

ममभक्तोऽस्त्वेहि गाम्न पूजयित्वा ततोभूयात्प्रीयतां मे [illegible] दिवाकर, एवं भक्तिसमा
युक्तोमममलोकं च गच्छति तत्र रविवारे प्रातःकाले कृतस्नानश्चाचान्तः पूर्ववत्सूर्यदेवता य
भ्यर्च्य निवेद्य ॐ अस्यादित्यरत्नो मुत्तामन पुनरनुत्पत्तिकामो ह्यादि संवत्सरं यावत्सूर्यादित्य
वासरे नक्तैकतर कालभोजननिवृत्तिव्रतमहं करिष्ये उपवासं च कुर्वीत यद्यत्वादित्यदिने स
दा जपंति च महाश्वेतां ते लभंति यथेप्सितं इदं व्रतं यावज्जीवं सूर्यदर्शनाभिधानात् पूर्व
वद्व्रतं निवेद्य ॐ अद्यथयथेप्सितलाभकामो ह्यादित्यवारमुपवासं महाश्वेता
जपं चाहं करिष्ये महाश्वेता मंत्रस्तु ह्रां ह्रीं सः नरसिंहपुराणे सप्तम्युक्ते रविदिने
सौरनक्तमधीयते स्नात्वार्कमर्चयित्वा प्रीतो वा नीरुजो भवत्यचिरं ॐ अद्याहमनवद्यायु
क्ताऽऽदित्यदिने नीरुज्यचिरं जीवितत्वकामः स्नानपूर्वकार्कार्चापूर्वक सौरनक्तैकतर
कालभोजननिवृत्तिव्रतमहं करिष्ये विष्णुरहस्ये नैवेद्यतद्व्रतफलं भविष्यपुराणे सूर्यो

श्रीमत्यां तकार्तिकरुद्रत्व [illegible] शिवकामनया [illegible] वर्षं यावत्प्रत्यहं पार्थिवलिंगपूजनमहं करि
ष्ये माघे त्रिकालपूजायां शिवधर्मे माघमासि सदा पुण्ये त्रिसंध्यं योर्चयेच्छिवं लभेत्वाग्नि
ष्टिकं पुण्यं मासेनैकेन संशयः। अथ मार्गे तथा चाषाढे कार्तिके [illegible] विशेषतः। त्रिषु पुण्यतमं मे
ये मासेष्वेतेषु यत्फलं ओं अद्य ... शिवपूजनजन्यपुण्यसमग्रप्राप्तिकामो मा
घमासे त्रिसंध्यं शिवपूजनमहं करिष्ये अथ वनलिंगनियमः। आषाढकार्तिकयोस्त्वेत
द्वत्त्रिसंध्यं शिवपूजने फलं तत्र कार्ये मासत्रमोक्षेविशेषः। एकाहपूजायां यत्फ
लं पाकयज्ञेषु हविर्यज्ञेषु यत्फलं एकाहात्तदवाप्नोति विप्रो लिंगार्चनेरतः। अथ विप्र
इति पूजामात्रोपलक्षणं लिंगपूजायां सर्वाधिकारात् ओं पाकयज्ञहविर्यज्ञजन्यपु
ण्यसमग्रप्राप्तिकामनया अद्यादि शिवलिंगपूजनमहं करिष्ये अथ यावज्जीवलिं
गं नकरणार्थिवमेव दशाहपूजायां गवांशतसहस्रस्य सम्यग्दत्तस्य यत्फलं दशाहात्त

वाञ्छितलाभसन्ततनंतरैहिकराजन्यसदाकल्याणकान्तकामनया ऽद्यादि वर्षं यावत्सञ्ज्ञान
तीयायां नक्तकालीनभोजनेतरनिवृत्तिव्रतमहं करिष्ये । वर्षान्ते गोदानं लिंगे उपवास
श्चतुर्दश्यां महापातकनाशनः अत्र यावज्जीवमस्मभयाणत्र चतुर्दश्यां विप्रो ब्राह्मणा
दानात् तत्र फाल्गुनशुक्लचतुर्दश्यां प्रातः काले पूर्ववत्सर्वं निवेद्य ॐ महापात
कनाशकामनया ऽद्यादि प्रतिचतुर्दश्युपवासव्रतमहं करिष्ये अथ लिंगपूजाफलं
पूजा पंचोपचाराः उपचाराश्चागंधपुष्पधूपदीपनैवेद्यरूपः तत्र सकृत्पार्थिवपूज लिंग
नं लिंगपुराणे यः कृत्वा पार्थिवं लिंगं पूजयेच्छुभवेदिकः इह हैव धनवान् श्रीमानं
तेरुद्रोऽभिजायते महादेवपूजायां विष्णुपूजायां च प्रथमतः सूर्यायार्घदानमा
वश्यकं तथाहि ब्रह्मपुराणे यावन्नदीयते चार्घं भास्कराय निवेदितं तावन्न पू
जयेद्विष्णुं शंकरं वा सुरेश्वरं तत्र प्रकारः पूर्ववत्सर्वं निवेद्य ॐ एहि के धनवत्व

र्थी उपोष्य व्याधिरहितो नृपवानभिजायते — एवं व्रतं निवेद्य ॐ व्याधिरहितस्त्वप्राप्त
काम नयाद्याधि वर्द्धयाव स्वाति शुक्लाष्टमी प्रति शुक्लचतुर्दशी चोपवास व्रतमहं करि
ष्ये कार्त्तिकादितृतीयायां मासयोगे मन्त्रयावकं नक्तं चरेद्व्रती एकमसौ गौरी प्रीता
भवेत् गौरीलोके वसेत् कल्पं ततो राजा भवेदिह एतद्रुद्रव्रतं नाम सदा कल्याणका
रकं तृतीयामेकवचनात् तृतीयापदेन प्रतिमासमन्वयात् कार्त्तिकादिशु
क्लतृतीयामात्र वृत्तिरिदं मासस्य शुक्लादित्वात् प्राथम्यात् शुक्लायाएव ग्रहणं
मन्त्रयावकपदेन तुल्यजाति व्रीह्यादि निवृत्ते रूपकरणस्य गोमादेरनुपादानावि
रुद्ध इति समयप्रदीपः वस्तुतस्तु यावकाहारस्य परिभाषा प्राप्तत्वादितरसर्वभ
क्ष्यनिषेध एवेति प्रतिभाति गोमूत्रयावको गोमूत्रखिन्नयवः तत्र कार्त्तिकशु
क्लतृतीयायां प्रातःकाले एवं वत्सरं निवेद्य ॐ गौरीलोकाधिका राकल्प 

त्वा ॐ ऐहिकभोगपारलौकिकशिवपुरगमनपर्यन्तस्याद्दि यावज्जीवं प्रतिकृष्णाष्टमीप्रति
कृष्णचतुर्दश्योर्नक्तेतरकालभोजननिवृत्तिव्रतमहं करिष्ये अथ महाव्रते तत्र भवि
ष्यपुराणे चतुर्दश्यां तथाष्टम्यां पक्षयोः शुक्लकृष्णयोः योऽब्दमेकं न भुञ्जीत शिवार्च
नपरः शुचिः यत्पुण्यमक्षयं प्राप्तं सततं सत्रयाजिनां तत्पुण्यं सकलं तस्य शिवलो
कं स गच्छति स्कंदपुराणे चतुर्दश्यामष्टम्यां च पक्षयोरुभयोरपि अहोरात्रं विपद्य
लं हि वत्सरमपोषितः स तेन कर्मणा युक्तः सर्वपापविवर्जितः न याति नरकं देवि यमं
च स न पश्यति फाल्गुनकृष्णचतुर्दश्यां प्रातः काले पूर्ववद्दूतं निवेद्य ॐ सर्वपापवि
वर्जितत्वनरकगमनयमादर्शनकामनयाद्यादि वर्षं यावत् प्रतिचतुर्दश्यष्ट
म्युपवासव्रतमहं करिष्ये अथ प्रथमव्रते शिवार्चनमंगमेव अग्रिमव्रते व्रतसामा
न्यधर्मतया प्राप्तमिति ज्ञेयः महाभारते अष्टमीमथ कौंतेय शुक्लपक्षे चतुर्दशी

नक्ताशी त्वष्टमीषु स्याद्वत्सरान्ते च धेनुदः पौरंदरपदं याति सुगतिव्रतमुच्यते एवं वृत्तं
निवेद्य ओं पौरंदरपुरगमनयाऽष्टम्यादिवर्षं यावदष्टमीषु नक्तभोजनेनेतरभोजननिवृ
त्तिव्रतमहं करिष्ये नक्तभोजनमत्र रात्रिभोजनं वर्षान्ते च धेनुदानं वाराहपुराणे
रौद्रव्रतं च चतुर्दश्यां कृष्णपक्षे विशेषतः तन्माघमासादारभ्य पूर्णे संवत्सरे द्विजः इदं
व्रतं नक्तं सर्वपापक्षयफलकं चेति वाराहपुराणेऽवाह एवंव्रतमिति समयप्रदीपः
तत्र शुक्लादिमाघमासपरिग्रहात् फाल्गुनकृष्णचतुर्दश्यामेवारम्भो भवति तत्र फा
ल्गुनकृष्णचतुर्दश्यां प्रातः काले पूर्ववत्सर्वं निवेद्य ओं पापक्षयकामोऽद्यादिवर्षं
यावत्कृष्णचतुर्दशीषु नक्तभोजनेनेतरभोजननिवृत्तिव्रतमहं करिष्ये भविष्य
पुराणे कृष्णाष्टमीतु नक्तेन तथा कृष्णचतुर्दशी इह भोगानवाप्नोति परत्र शि
वमश्नुते फाल्गुनमासस्यारम्भः फाल्गुनकृष्णाष्टम्यां प्रातः काले पूर्ववत्सर्वं कृ

देहत्वः प्रीयंतां मे भवेत्सदा अनेन विधिना पार्थ सौभाग्यं पुत्रसंततिः वर्द्धते नात्र संदेहो
नान्यथा मम भाषितं उपहारो हि देवीनां द्रव्योपकरणानि च तेन देवीपूजावसरे कन्य
कानां दाने उपस्कारः केदारखण्डे च अत्रोपवासं राज्यफलं अग्निकर्मणि सौभाग्यदायि
से॰ नीतिसमयप्रदीपः अत्रोपवासे कल्पसर्वं बहुतं निवेद्य ॐ राज्यप्राप्तिकामनया माघादि
माघमासस्य शुक्लचतुर्थ्यामुपवासव्रतमहं करिष्ये अग्निमव्रतेन तु अद्य माघस्य शुक्लच
तुर्थ्यां सौभाग्यपुत्रसंततिसमृद्धिकामनया गौरीपूजनव्रतमहं करिष्ये ततो यथाश
क्त्युपपादितवस्तून्युपकल्प्य गौरीमावाह्य स्थापयित्वा गन्धानुलेपनेन पुष्पधूपनैवेद्यैः
पूजयित्वा एतानि केदपत्रशाकलवणगुडक्षीरकर्करा घृतजीरकपूर्णपात्रमृण्मयभां
डानि ॐ गौर्यै नमः इति निवेद्य ततो देव्याः प्रीयंतां मे सदा इति कन्याभ्यः प्रतिपा
दयेत् देवीं विसर्जयेत् इति कुंदचतुर्थीव्रतं अथ शिवव्रतानि मत्स्यपुराणे

भवति अथदेवीव्रतानि नवम्यांनववर्षाणि राजन्विघ्नमुक्तोभवेत् तस्मात्तुष्टाभवेद्गौ
रीसर्वलाभप्रदासदा ॐभगवन्सूर्यभगवत्यादेवताअद्यादिनववर्षाणियावन्नव
म्यांविहितरभोजननिवृत्तिव्रतमहंकरिष्ये अग्निपक्वमभुंजानोयावज्जीवंव्रतीभवेत्
महादुःखचवरदा तस्मान्नेतफलंभवेत् अत्रनवम्यामेवप्रकरणात् वरदादेवीतिसं
बंधः सर्वबद्धांतनिवेद्य ॐमत्संप्रदानकगौरीवरदव्रतानेतत्फलप्राप्तिकामनयाऽ
द्यादियावज्जीवंनवम्यामग्निपक्वभोजननिवृत्तिव्रतमहंकरिष्ये इदंव्रतद्वयम
भयनवम्यामविशेषात् माघमासंतुसंप्राप्यचतुर्थीकुंदसंज्ञिका तस्यांपोष्यसुर
श्रेष्ठ ततोराज्यंभविष्यति सर्वोपहारसंपन्नंसर्वोपस्करमादिशेत् कुंदपत्रफलैश्शा
केलवणगुडशर्कराः वेष्टंचजीरकंचैवद्रव्याणिविविधानिच दातव्यानिसुरश्रे
ष्ठकन्याकानांतुभक्तितः पूर्णायांतुतथाभांडंप्रतामयानिविशेषतः तान्यहिष्पद

चनै एवोदनेनपयसापायसेनहिजांस्तथा तथैवकृसरपस्तस्य षष्ठ्यांसम्यगुपोषितः
रक्तोत्पलैः सुगंधाढ्यैः रक्तपुष्पैश्चपूजयेत् एवंयः पूजयेद्भक्त्यानरोमां विधिवत्सदा उ
भयोरपिसप्तम्योः सपुत्रंलभतेपरं एवंव्रतत्रयमितिप्रतिभाति तत्रप्रथमव्रतेमाघशु
क्लसप्तम्यां एवंवक्ष्यमाणमन्त्रमादाय ॐभगवन्सूर्यभगवत्योदेवताश्चष्याद्विवर्षया
वदुभयपक्षसप्तम्यामुपवासकृत्ताद्विसपूजनव्रतमहमाचरिष्यामीतिनिवेद्य ॐ
अष्याद्दित्यांगसंभव पुत्रविवृयषा ःपरमायुः प्राप्तकामनया आदिवर्षयावदुभयपक्ष
सप्तम्यामुपवासकृद्ब्रविपूजनव्रतमहंकरिष्ये तृतीयव्रतेतु ॐभगवन्सूर्यभगवतो
देवताश्चप्याद्वियावज्जीवसप्तम्यामुपवासकृद्ब्रविपूजनानंतरमग्नौहोमः दधिभक्त
दुग्धादिनांपायसेनचद्विजतर्पणं कृष्णपक्षसप्तम्यां रक्तोत्पलैः पूजा शुक्लषष्ठ्यांसमु
पोषितइतिषष्ठ्यांसप्तमीमिश्रायामित्यर्थः तेनसप्तम्युपवासप्रतिपादनंविरोधेनभ

व्र॰ प॰
२

जन्मनि जायते परत्र च शुभं स्थानं प्रज्ञानान्निवर्त्तते तत्र माघमासीयशुक्लसप्तम्यां ॐ अद्येहि
कारोग्यधनधान्यपरलौकिकशुभस्थानप्राप्तिकामो ह्यादिवर्षं यावत् सप्तम्यामुपवासात्मकरविपू
जनव्रतमहं करिष्ये इति संकल्प्य रजायां ॐ आदित्य भास्कर रवि भानु सूर्य दिवाकर र
विविस्वन्नुपतया पूजाकाले ध्येयः अत्र पुत्रफलकसप्तमी भविष्यपुराणे आदित्य उवाच
माघमासि सिते पक्षे सप्तम्यां समुपोषितः यः पूजयति मां भक्त्या तस्याहं पुत्रतां व्रजे
एवं चोभयसप्तम्यां मासि मासि सुरोत्तम यस्तु मां पूजयेद्भक्त्या सम्यगेकैकमादरात् प्रथ
ज्ञानितस्तस्य चात्मनो ऽप्यंशसंभवं विजयश्च तथा पुत्रमरोग्यं परमं तथा माघमासि
सप्तम्यां शुक्लपक्षे जितेन्द्रियः ओं ध्यविधिवत्पुष्पाद्यैस्तमाल्यविलेपनैः पूजयि
त्वा तु मां भक्त्या निशि भूमौ स्वपेद्बुधः पुनः कृत्वा च सप्तम्यां कृत्वा स्नानादिकां क्रियां
पूजयित्वा तु मां ब्राह्मणान् दीन होमं समाचरेत् प्रीणयित्वा हरिं भक्त्याह विप्रान्भलो राम
२

ॐ अद्य यथाकृते गोदान प्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायब्राह्मणाय तुभ्यमहं संप्रददे ॥

पदनिवेश इति विशेषः । मत्स्यपुराणे सप्तम्यां नक्तभुग्भूत्वा दद्याद् दुग्धवतीं गां पयस्विनीं सूर्यलो
कमवाप्नोति भानुव्रतमिदं स्मृतं माघमासीयसप्तम्यां ॐ सूर्यलोकप्राप्तिकामो यावदेव
हं यावत् सप्तम्यां नक्तैकतत्कालभोजननिवृत्तिव्रतमहं करिष्ये । वर्षान्ते गोदाने तत्र वाक्ये
देवब्राह्मणौ संपूज्य ॐ अद्य वर्षावच्छिन्नकृतसप्तमीनक्तव्रतान्ते इमां गां पयस्विनीं रुद्र
दैवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे । ॐ स्वस्तीति प्रतिवचनं
अथारोग्यसप्तमी वाराहपुराणे अथापरं महाराज व्रतमारोग्यसंज्ञकं कथयामि परं
पुण्यं सर्वपापप्रणाशनं तस्मिन् माघमासस्य सप्तम्यां समुपोषितः । पूजयेद्भास्करं देवं
विश्वरूपं सनातनं आदित्यभास्कररविभानुसूर्यदिवाकरप्रभाकरेति संपूज्यो देवः स
र्वेश्वरो रविः षष्ठ्यां चैव कृताहारः सप्तम्यामुपवासकृत् अष्टम्यां चैव भुंजीत एव
पवविधिक्रमः । अनेन वत्सरं पूर्णं विधिना पूजयेद्रविं तस्यारोग्यं धनं धान्यमिह

पु·प·
१२

तथैवं ॐ भगवन् सूर्य भगवन्तो देवता इत्यादि नक्षत्रा संप्राप्य प्रत्यहं शिवलिंगपूजनमह
माचरिष्यामीति निवेद्य ॐ सर्वेषां यज्ञानां सर्वदान सर्वयज्ञ सर्वतीर्थाश्रमविधिव्रत जन्मफ
लसमफलप्राप्तिकामनयाद्या इति नक्षत्रमासान्संप्राप्य प्रत्यहं शिवलिंग पूजनमहं करिष्ये
विजितेन्द्रियस्तां यावज्जीवं पूजायां यत्फलं जायते नित्यं लिंगं त्रिभुवनेश्वरं स्वर्ग
राज्यभोगानां प्राप्तिर्भवति भाजनं ॐ भगवन् सूर्य भगवन्तो देवता इत्यादि यावज्जी
वं शिवलिंगपूजनमहमाचरिष्यामीति निवेद्य ॐ स्वर्गराज्यभोगप्राप्तिकामो इत्यादि
यावज्जीवं शिवलिंगपूजनमहं करिष्ये एकभक्तेन संवत्सरं शिवलिंगपूजायां संवत्स
रं तमां देवि एकाहारेणायोचयेत् न तस्य पुनरावृत्तिः सत्यमेतद्ब्रवीम्यहं ॐ भगवन्
सूर्य भगवन्तो देवता इत्यादि संवत्सरं यावत् प्रत्यहमेकभक्तं कुर्वन् शिवलिंगपूजन
महमाचरिष्यामीति निवेद्य ॐ अपुनरावृत्तिकामो इत्यादि वर्षं यावदेकाहारेणा

रम·
१२

दवाप्नोति सम्यग्लिंगार्चनेरतः ॐ गोसहस्रदानजन्यपुण्यसमपुण्यप्राप्तिकामनयाऽद्यादि द-
शाहं यावत्प्रत्यहं शिवलिंगपूजनमहं करिष्ये प्रत्यहं विंशतिरात्रपूजायां वाजपेयशतैरि-
ष्ट्वा यत्फलं भवेत्तद्विजोत्तमाः विंशा विंशतिरात्रेण रुद्रभक्त्यातदाप्नुयात् भक्तिरत्नपूजा-
पूर्वेव ॐ अद्य वाजपेयशतजन्यफलप्राप्तिकामनयाऽद्यादि विंशतिरात्रं यावत्प्र-
त्यहं शिवलिंगपूजनमहं करिष्ये मासपर्यन्तपूजायां अश्वमेधसहस्रस्य सम्यगि-
ष्ट्वा यत्फलं मासेन तदवाप्नोति रुद्रलिंगार्चनेरतः ॐ अश्वमेधसहस्रजन्यफ-
लप्राप्तिकामनयाऽद्यादि मासं यावच्छिवलिंगपूजनमहं करिष्ये नवमासपूजायां
पुण्यतीर्थाभिषेकेऽस्म सर्वदानफलानि च सर्वयज्ञफलं चैव उपवासफलानि च
ततो विविधिनाश्चास्म व्रतानि विविधानि च सम्यगिष्टफलाः सर्वे ते माचारसमाधि-
ना नवमासान्समासाद्य ब्राह्मणो विजितेंद्रियः सर्वमेतदवाप्नोति लिंगयोर्चय

स्रं शिवलिंगपूजनमहं करिष्ये सहस्रपूजने सहस्रं पूजयेद्यस्तु निरंतं तपसाति रुद्र
लोकमवाप्नोति भक्त्याभोगानन्नतमान् तथा सहस्रपूजनात्सोपि लभते वांछितं फलं
ॐ भगवन् सर्वभगवतोदेवताभ्याद्यादिपार्थिवसहस्रशिवलिंगपूजनमहं माचरिष्या
मीतिनिवेद्य ॐ निरयादर्शनभोगोपभोगसर्वकरुद्रलोकगमनप्राप्त्यादिपार्थिव
सहस्रशिवलिंगपूजनमहं करिष्ये अथवा पूर्ववन्निवेद्य वांछितफलप्राप्तिका
मनयस्यादि लक्षलिंगपूजायां लक्षलकुर्तेयस्तु शिवत्वं लभते ध्रुवं ॐ भगवन्
सर्वभगवत्योदेवताभ्याद्यादिपार्थिवलक्षशिवलिंगपूजनमहमाचरिष्यामीतिनि
वेद्य ॐ शिवत्वप्राप्तिकामनयाद्यादिपार्थिवलक्षशिवलिंगपूजनमहं करिष्ये
अथ यजामयादि शिवलिंगपूजनफलं सद्रूप्रगोशाकत्रिंशत्सहस्रवालुकया पिवा
कृत्वा लिंगं सहस्रं स्यावमेकल्पायुतं दिवि सर्वेषामेव वर्णानां स्फाटिकं सर्वका

कृ॰प॰
९३

मद्भः सर्वदोषविनिर्मुक्तमन्यथा दोषमावहेत् नर्मदागिरिजं चैव मन्यद्वापि हि लिंगव
त् कृत्वा पूजां च राजेंद्र लभते वांछितं फलं सर्वकर्मनिवेद्य ओं अद्यकल्पपुत्रादिविवाह वछिन्न"
कामनया श्रीकृष्णगोमयभस्मस्फटिकलिंगपूजनमहं करिष्ये एवं मृत्तिकादिशिवलि
गपूजनफलमपि दृष्टिशिवपूजा अथ विष्णुव्रतानि तत्र वाराहपुराणे एकादश्यां म
हाभाग उपवासो विधीयते नरसिंहं समभ्यर्च्य सर्वपापैः प्रमुच्यते सर्वपापैः प्रमुच्यत इ
त्यर्थो मुक्तिश्चैव व्रतं चेदं श्रीकृष्णैकादश्यामारभ्य एकादिनसमाप्ते केवलं तोनि रत्नाकरः
तत्र यस्यां कस्यांचिच्छुक्लैकादश्यां सूर्योदयानंतरं कृतस्नानादिराचांतः पूर्ववद्व्रतं निवे
द्य ओं भगवन्सूर्य भगवत्प्रीत्यै देवतारौकाहार्चनपूर्वक उपवासव्रतमहं करिष्ये ओं अद्यस
र्वपापमुक्तिकाम एकादश्यां नरसिंहार्चनपूर्वकोपवासव्रतमहं करिष्ये पूजा च
गंधपुष्पधूपदीपनैवेद्यैः एकादश्यां नक्तव्रते वाराहपुराणे एकादश्यां तु यो नैव नक्तं

राम
९३

विष्णुः लोक अजमर्येकादश्यामुपोषितः। उक्तं तथा विद्वादश्यां पूजायाः प्रधानस्यानुरो
धात् यत्र द्वादशीत्रुटिर्न भवति तत्र सर्वैदिने एकादश्यतिरेकेणाप्युपवासः कर्त्तव्यः
स्नानादिकं कृत्वा ताम्रपात्रादिकमादाय मार्गशुक्लैकादश्यां प्रभृत्यौदयानन्तरं ॐ भग
वन् सूर्य भगवत्पादेवताऽद्यादिसंवत्सरं यावदुपवासपूर्वकं व्रतं शुक्लद्वादश्यां भगव
द्वासुदेवपूजनव्रतमहमाचरिष्यामीति निवेद्य ॐ सर्वपापक्षयकामोऽद्यादि संवत्सरं
यावदुपवासपूर्वकं भगवद्वासुदेवपूजनव्रतमहं करिष्ये पूजां चैव पुष्पधूपानु
लेपन नैवेद्य वह्नि ब्राह्मणतर्पणैः कर्त्तव्या ॐ नमो भगवते वासुदेवायेति होममंत्रः
यावज्जीवमेतद्व्रते पूर्वेव ताम्रपात्रादिकमादाय ॐ भगवन् सूर्य भगवत्पादेवता
द्याद्यादि संवत्सरं यावदुपवासपूर्वकं उभयद्वादश्यां भगवद्वासुदेवपूजनमहं करिष्ये
यावज्जीवमुभयद्वादश्यां पूजने ॐ भगवन् सूर्य भगवत्पादेवताद्याद्यादि यावज्जी

कुर्यो यथाविधि मार्गशीर्षस्य शुक्लायामारभ्य कं विचक्षणः एतद्व्रतं धनदस्य कृतं वित्तप्र
यच्छति पूर्ववत्स्नानादिकं कृत्वा मार्गमासीयशुक्लैकादश्यां स्वयं पौष्ये हस्ते ताम्रपात्रं वारि
पूर्णमादाय ॐ भगवन् स्वयं भगवत्प्रोदेवता स्यादि वर्षं यावत् प्रत्येकादश्यां नक्तभोज
नेतरभोजननिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य वित्तकामो स्यादि वर्षं यावत् प्रत्ये
कादश्यां नक्तभोजने तरभोजननिवृत्तिव्रतमहं करिष्ये नत्र विशेषः एवं हवि
ष्यभोजनादयः सह नक्तव्रतधर्माः अथैकादश्यां तस्य शुक्लायामारभ्यान्यथा त
एकादशमुपवासपूर्वकं वर्षं यावत् द्वादश्यां वासुदेवपूजने विशेषः मार्गशुक्लैका
दश्यामुपोषितो द्वादश्यां भगवन्तं वासुदेवमर्चयेत् पुष्पधूपानुलेपनदीपनैवेद्यैर्व
स्त्रि आच्छादनैस्तथाशीतैः व्रतमेतत् संवत्सरं कृत्वा पापेभ्यः पूतो भवति यावज्जीवं कृत्वा
श्वेतद्वीपमवाप्नोति अथ यः द्वादश्यां प्रीत्या वर्षं संवत्सरेण स्वर्गलोकमवाप्नोति अत्र

ष्टउपवासव्रतमहमाचरिष्यामीति निवेद्य ॐ परमविष्णुपदप्राप्तिकामोऽद्यामुकपक्षैकादश्युपवा
सव्रतमहं करिष्ये उपवासप्रकारस्तु स्नात्वा धौते वाससी परिधाय जितेन्द्रियः समाहितो गं
धपुष्पधूपनैवेद्यबहुविधोपहारजपहोमनानाविधैः स्तोत्रगीतनमोनृत्यवाद्यैर्देवस्य
तोषयेत्तन्मन्त्रैः प्रणामं कृत्वा विष्णोर्गीतकथादिगायनै रात्रौ जागरणं कुर्यात् नारदीय
पुराणे एकादश्युपवासे पूर्ववत्ताम्रपात्रमादाय ॐ भगवन्सूर्य भगवतो देवताऽद्यैका
दश्युपवासव्रतमहमाचरिष्यामीति निवेद्य ॐ अश्वमेधसहस्रराजसूयशतफलाधि
कफलप्राप्तिकामोऽद्यादि प्रतिमासमेकादश्युपवासव्रतमहं करिष्ये अथवा गंगागया
काशीपुष्करकुरुक्षेत्ररेवादेविकायमुनाचन्द्रभागादिस्नानजन्यफलाधिकफलप्रा
प्तिकामोऽद्यादि एकादश्युपवासव्रतमहं करिष्ये अथवा मातृपितृपितामहतत्पितृ
तन्मातामहमातृजनकसहितात्मविष्णुलोकप्राप्तिकामोऽद्यादि एकादश्युपवासव्र

वमुपवासपूर्वकउभयद्वादश्योर्भगवद्वासुदेवपूजनमहमाचरिष्यामीतिनिवेद्य
ॐविष्णुलोकावच्छिन्नकामनयाद्यादिप्रावज्जीवमुपवासपूर्वकमुभयद्वादश्यो
र्भगवद्वासुदेवपूजनमहंकरिष्ये एवमेतयोःपूर्वकृत्यं एवंपौर्णमास्याममावा
स्यायांचोपवासपूर्वकवासुदेवपूजनंचतच्चतुर्थफलंत्वल्पमेव यावज्जीवमुभये
कादश्योपवासमात्रे मार्गशुक्लैकादश्यां प्रातःकाले कृतस्नानादिराचांतः ॐभ
गवन्सूर्यभगवतोदेवतायैकादश्युपवासव्रतमहमाचरिष्यामीतिनिवेद्य ॐ
अमुकसार्थेचतुर्थयप्राप्तिकामोद्यादि प्रतिमासमेकादश्युपवासव्रतमहंकरिष्ये
ॐदुर्गमार्गसंतरणपूर्वकस्वर्गप्राप्तिकामोद्यप्रभृत्येकादश्युपवासव्रतमहंकरिष्ये
इतिच व्रतद्वयमेतद्धि स्मरहस्योक्तं ब्रह्मपुराणेप्येकादश्यां द्वादश्योपवासे पू
र्वेव ताम्रपात्रमादाय ॐभगवन्सूर्य भगवतोदेवताऽस्याशुभयणदेकाद

कृ॰प॰
१८

याम: संकल्पव्यतिरेकेणाप्युपवासः । [illegible] नित्यत्वात् । यानि कानि च पापानि ब्रह्महत्यासमा
नि च । अन्नमाश्रित्य तिष्ठन्ति संप्राप्ते हरिवासरे । इत्यादिवाक्यैरकरणे प्रत्यवायप्रतिपादनात् । गृ
हस्थानां पुत्रमतां नित्यत्वे । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । वनस्थयतिधर्मोयं शु
क्लामेव सदा गृही । इति वाक्यात् । अथाशून्यशयनव्रतं मत्स्यपुराणे । ब्रह्मोवाच । भगवन्
पुरुषस्येह स्त्रियाश्चाविरहादिकं । शोकव्याधिभयं चैव न भवेद्येन तद्वद । श्रीभगवानुवा
च । श्रावणस्य द्वितीयायां कृष्णायां मधुसूदन । क्षीरार्णवे सलक्ष्मीकः सदा वसति के
शवः । तस्मात्संपूज्य गोविंदं सर्वान्कामान् समश्नुते । गोभूहिरण्यदानादि सप्तकल्पश
तानुगः । अशून्यशयनं नाम द्वितीयायां प्रकीर्तितं । तस्मात्संपूजयेद्भक्त्या इमैर्मन्त्रै
र्विधानतः । श्रीवत्सधारिन् श्रीकांत श्रीधाम श्रीपतेऽव्यय । गार्हस्थ्यं मा प्रणाशं मे या
तु धर्मार्थकामद । अग्नयो मा प्रणश्यन्तु देवताः पुरुषोत्तम । पितरो मा प्रणश्यन्तु

राम॰
१८

तमहं करिष्ये अथवा यमकर्तृकलिखितसंमार्जनगमनत्यागानंतरहरिलोकगमनकुलत्रय
समुद्धरणानंतरयममार्गपूर्वक हरिमंदिरप्राप्त्यनेककल्पस्थानेकदानानेकतीर्थानेक
विप्रभोजनातिरिक्तव्रतगणाधिकगतिप्राप्तिकामोऽद्यामुकैकादश्युपवासव्रतमहं करिष्ये
नारदीयपुराणे एकादश्युपवासे कस्मिंश्चिदेकादशीपूर्वं पूर्ववज्जलपात्रमादाय
ॐ भगवन् सूर्य भगवत्प्रोक्तव्रतस्याद्यैकादश्युपवासव्रतमहं क[illegible]मा चरिष्या
मीति निवेद्य ॐ अघपापराशिक्षयकाम एकादश्युपवासव्रतमहं करिष्ये अथवा ए
वं वन्निवेद्य ॐ हत्याद्युपपापक्षयपूर्वं सर्वयज्ञफलप्राप्तिकामनयेत्यादि एतद्व्रतं च यथ
स्या कस्मिंश्चिदेकादशीपूर्णं एकादश्युपवासजागरणे ॐ अद्यैकादश्यां पितृवंशदश
पुरुषमातृवंशदशपुरुषपत्नीसहितात्मोद्धरणपूर्वक विष्णुलोकगमन
कामः उपवासं कुर्वन् जागरणमहं करिष्ये अत्र निवेदनव्रतरूपत्वान्न च कालनि

वर्णौमुपस्कारसमन्वितौ प्रतिमौ देवस्य सौदक्षिणे निवेदयेत् एवं यस्तु पुमान् कुर्यात्
स्वनयने हरेः छिन्नपापो नरः हितो नारायणपरायणः नतस्य पत्न्या विरहः कदाचिदपि
जायते नारी च विधवा ब्रह्मन् यावच्चन्द्रार्कतारकं एवमेव लाईक्ष्मी के समय प्रदीपे लवि
तो रत्नाकरे च न विघ्नं पन्नगो वा नीद्रापन्यं जायते कश्चित् न पुत्रपशुरत्नानि क्षयं याति
पितामह सप्तकल्पसहस्राणि सप्तकल्पशतानि च कुर्वन् स व्रतमाप्य च विष्णुलोके
महीयते विष्णुं पूजयेदिति सलक्ष्मीकं विष्णुं पूजयेत् उपक्रमे तथा कीर्तनात् त्रि
याणे तत्कृते क्रियमाणो कलत्रपदे पति पूर्व्वेनोहः कर्तव्यः उरुवस्य श्रियश्चेति प्र
क्रमात् पुण्याहिशो प्रकृतिविकृतिभावाभावेनोहाभावादिति सप्तमपक्षेण
यावत्तस्याश्वतद्वयं पावत्कलह्रितीयाचाङ्घ्रयं स्यादित्यर्थः एवं च एवंसप्त
उपजीविंदम पत्नी याने तल वर्जितमिति पूजानन्तरम नैलाप्यन प्रतिपादनात् य

मत्तोर्दर्पसमेदतः लक्ष्म्या वियुज्यते देवो न कदाचिद्यथा भवान् तथा कलत्र संबंधो
देवमामे वियुज्यतां लक्ष्म्या निश्चलं वरद यथा ते शयनं सदा शय्या ममाप्यशून्यास्तु
तथैव मधुसूदन गीतनिर्घोषवादित्रै देवदेवस्य कारयेत् घंटाभवेत्पुष्पकस्तस्
थैवा राममयीयतः एवं संपूज्य गोविंदं मञ्जीया तैलवर्जितं नक्तं न क्षारलवणं
यावत्तस्मात्त्रतुष्टयं ततः प्रभाते संजाते लक्ष्मीपतिसमन्वितां दीपान्नभाजनै
र्युक्तां शय्यां दद्याद्विचक्षणः पादुकोपानहच्छत्रचामरासनसंयुतां अभीष्टो
पस्करैर्युक्तां शुक्लमाल्यांबरैर्युतां सोपधानकविश्रामां फलैर्नानाविधैर्युतां
तथाभरणधान्यैश्च यथाशक्त्या समन्वितां अव्यंगाय च विप्राय वैष्णवाय कुटुं
बिने दातव्या वेदविदुषे न च कुष्ठेन कस्यचित् तत्रोपवेश्य दांपत्यमलंकृ
त्य विधानतः पत्न्यास्तु भोजनं दद्याद्भक्ष्यभोज्येन संयुतां ब्राह्मणस्यापि सा

तैवदिने पूजा तत्तैवादिने तैलाभ्यङ्गं श्रावणकृष्णद्वितीयामेव तत्सांह जयेत विष्णुं इति
कीर्तनात् अगस्त्यो यावन्न दीयात् कृष्णद्वितीया भवति तावत् प्रकृतिलद्वितीयातिथि भुंगो
विंद पूजनं नक्तमनैव लमदा प्रलव ... च भोजनमित्यर्थः पद्मपि भविष्यपुराणेत्यायाम्
न्यमंथन द्वितीयाव्रते एवं करोति यः सम्यक् नरो मासचतुष्टये इति तत्रापि मासच
तुष्टयकृष्णद्वितीयायामित्यर्थः तथा च रत्नाकरे व्याख्यातं मासचतुष्टं पक्षद्वि
तीयायामित्यर्थः मासचतुष्टयावच्छिन्नत्वे व्रतस्य द्वितीयाव्रतं तत्त्वं भजेत लक्ष्मी
पतिसमन्वितामिति लक्ष्मीपतिश्रुतिमायत्राधिवसिता एवंभूतां प्राप्यादित्यादि
त्यर्थः नचलक्ष्मीपतिसहितायाएवदानं श्रुतिमायात्स्वगृहदानकथनं मास
श्चाचकृष्णादिः समाचारादिति रत्नाकरः अथैतत्प्रयोगः श्रावणकृष्णद्वि
तीयायां प्रातःकाले कृतस्नानादिराचांतः पूर्ववत्ताम्रपात्रमादाय ॐ भगव

नस्त्वयं भगवन्तो देवताः श्यादिमासचतुष्टयाधिकरणसल्लक्ष्मीकविष्णुरूपजनार्द्दनाशू
न्यशयनव्रतमहमाचरिष्यामीति निवेद्य ॐ यावच्चन्द्रार्कतारकं निजदांपत्यवियोगाधि
दुःखशोकार्त्तो। निजदांपत्यभवनधनधान्यरत्नादि तयाभावसञ्चकरणाह हस्तसंपूतकल्प
प्रणाम वच्छिन्नविष्णुलोकमहितत्वकामनया श्याादिमासचतुष्टयकालस्थितायाधि
करणकसल्लक्ष्मीकविष्णुरूपजनार्द्दनाशून्यशयनव्रतमहं करिष्ये इति संकल्प कृत्वा
कांस्यमिश्रवट्टनमग्रहे उत्तमपात्र्यां दीपान्नभाजनादि पादुकोपानहच्छामरच्छत्रपीठपात्र्यो
पकरणान्वितेन तोयपूलपूजनयुतां शय्यां उपवस्त्रोत्थादितां सगुडकाननाफलयुतां शा
भरणो धान्यैश्च संयुतां वितानयुतां सपकल्पनत्संपाद्याय्यां सौवर्णी सल्लक्ष्मीकवि
ष्णुप्रतिमारोप्य ॐ भगवन् सलक्ष्मीक विष्णो इहागच्छ इह तिष्ठ सावाराप्यस्थापयि
त्वा एतानि पाद्यार्घाचमनीयपुनराचमनीयानि ॐ सलक्ष्मीकविष्णवे नमः

अथ मासचतुष्टयादिकृतमेतन्मासपरित्यागे इदमेव फलम् । अत्रार्द्धिपादिकमृणोयः कश्चिन्मासः
आश्विनमासमांसपरित्यागे अथवा आश्विने मासं वर्जयेन्मांसभक्षणं मासषट्कृतं तेन पुण्यं लभते ना
रः सम्यक् । आश्विनशुक्लप्रतिपदि कृतस्नानादिः प्रातःकाले ॐ भगवन्सूर्य भगवत्यो देवताः
आश्विनमासं व्याप्य मांसभक्षणानिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ मासषट्कावच्छिन्न
मांसभक्षणानिवृत्तिजन्यपुण्यसमपुण्यप्राप्तिकामोऽद्यारभ्य आश्विनमासं व्याप्य मांसभक्षणानिवृ
मास° त्तिव्रतमहं करिष्ये । कार्त्तिकमांसपरित्यागे योनरः कार्त्तिके मासे मांसं तु परिवर्जयेत् । संवत्स
रस्य लभते फलं मांसविवर्जनात् । तुलासंक्रान्तौ प्रथमदिने प्रातःकाले कृतस्नानादिस्ताम्रपा
त्रमादाय ॐ भगवन्सूर्य भगवत्यो देवताः अद्यादि कार्त्तिकमासं व्याप्य मांसभक्षणानिवृत्तिव्र
तमहमाचरिष्यामीति निवेद्य ॐ संवत्सरावच्छिन्नमांसभक्षणानिवृत्तिजन्यसमपुण्यप्रा
प्तिकामोऽद्यादि कार्त्तिकमासं व्याप्य मांसभक्षणानिवृत्तिव्रतमहं करिष्ये । एवमौरमासस्या
चारादिति समयप्रदीपः । अथ श्रावणादिचतुर्मासमांसनिवृत्तौ वर्षाचातुर्मास्या

धर्मे स्थितिर्गुरुशुश्रूषणारति प्राप्यदेवनिषेवनं दिव्यलोकप्राप्तिकामो मांसभक्षणानिवृत्तिव्रतम
हं करिष्ये दिनत्रयमांसपरित्यागे मांसान्नुविरतो मर्त्यः स्वर्गं प्राप्नोति दिनत्रयं दिनत्रयं मांसाद्विरत्तः
स्वर्गं याति नो मर्त्यः ॐ भगवन् सूर्य भगवत्यो देवताभ्यो दिनत्रयं व्याप्य मांसभक्षणानिवृत्तिव्रतम
हमाचरिष्यामीति निवेद्य ॐ स्वर्गप्राप्तिकामोऽद्यादि दिनत्रयं व्याप्य मांसभक्षणानिवृत्तिव्रतमहं क
रिष्ये मासमांसपरित्यागे यो मासे वर्जयेन्मांसं उरुषः शुभलक्षणः स याति स्वर्गमतुलं दिव्य
भोगसमृद्धिमान् ॐ भगवन् सूर्य भगवत्यो देवताः अद्यादि मासं व्याप्य मांसभक्षणानिवृत्तिव्रतम
हमाचरिष्यामीति निवेद्य ॐ दिव्यभोगसमृद्धिमत्वा च लस्वर्गप्राप्तिकामोऽद्यादि मासं व्याप्य
मांसभक्षणानिवृत्तिव्रतमहं करिष्ये मासद्वयमांसपरित्यागे ये वर्जयन्ति मांसानि मासतः पक्ष
योपि वा तेषां हिंसाविहीनानां ब्रह्मलोके विधीयते ॐ भगवन् सूर्य भगवत्यो देवताः अद्यादि मा
सद्वयं व्याप्य मांसभक्षणानिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ ब्रह्मलोकप्राप्तिकामोऽ
ऽद्यादि मासद्वयं व्याप्य मांसभक्षणानिवृत्तिव्रतमहं करिष्ये एवं पक्षत्रयद्वयादिक्रमेण मास

व्र॰प॰
१६

कैलस्य द्वितीयायां पूजां कृत्वा तदग्रिमदिने प्रभाते पूर्वोक्तलिखितां माध्यां विष्णुप्रतिमां वर्ज-
यित्वा अशेषोपकरणयुतामभ्यंगायवैश्यवायकुटुंबिने ब्राह्मणाय वेदज्ञाय दद्यात् दा-
नेच प्रतिपादनमात्रं ततो कौपनःमाघ्यायां द्विजदंपती उपवेश्य भक्ष्यभोज्यसमन्वितं भो-
जनं ब्राह्मणाय प्रतिपादयेत् सौवर्णी सलक्ष्मीकविष्णुप्रतिमां पूजोपकरणयुतां
सजलहस्तेन ब्राह्मणाय प्रतिपादयेत् इति मत्स्यपुराणीया स्नानद्वायनद्वितीया
व्रतपद्धतिः अथ मांसपरित्यागफलं तत्रैकदिने मांसपरित्यागफले पद्मपुराणम्
कृत्स्नधर्मस्य गुरुपूर्वमुखारतः गच्छेल्लोकं शुभं मर्त्यो दिव्यदेवनिषेवितं तमेव
दिवसं मांसाहिरतो लोकमाप्नुयात् दिवसं प्राप्य मांसाद्विरतस्तेनैव लोकमाप्नुया-
दित्यर्थः प्रातःकाले कृतस्नानादिस्ताम्रपात्रमादाय ॐ भगवन्सूर्य भगवन्यो-
देवताऽद्य मांसभक्षणनिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ अद्यस्मत्कृत १६

इदमनुलेपनं ॐ सलक्ष्मीकविष्णवे नमः ततः पुष्पाण्यादाय श्रीवत्सधारिणश्रीकान्तश्री
वासश्रीपतेऽव्यय गार्हस्थ्यं माप्रणाशं मे यातु धर्मार्थकामद अग्नयो मा प्रणश्यन्तु दे
वताः पुरुषोत्तम पितरो मा प्रणश्यन्तु मत्तो दाम्पत्यभेदतः लक्ष्म्या वियुज्यते देवो न क
दाचिद्यथा हरिः तथा कलत्रसंबंधो देव मा मे वियुज्यताम् लक्ष्म्या विशून्यं वरद
पद्यते शयनं सदा शय्या ममाप्यशून्यास्तु तथैव मधुसूदन इति पठित्वा सल
क्ष्मीकाय विष्णवे नमः इति त्रिः पूजयेत् ततस्तानि गंधपुष्पधूपदीपनैवे
द्यतांबूलयज्ञोपवीतवस्त्राणि ॐ सलक्ष्मीकाय विष्णवे नमः इति त्रिः दद्यात्
ततो भवेत्सम्यक् दिव्यगीतवादित्रनिर्घोषं कारयेत् अन्यथा यासंभवे घंटामपि
वादयेत् ततो गावतैलमदारलवणां च भुंजीत दारेषु कुकाष्टिकर्णोटि
एवं भाद्रपदादिमासचतुष्टये कृष्णद्वितीयायां विष्णुपूजनं कुर्यात् ततः कालिक

मान्यो मांसं परिवर्जयेत् चत्वारि भद्राण्यवाप्नोति कीर्तिमायुर्यशोबलं अथोवाच ५ श्रावणे
तद्गृह्णीयात्संक्रांतौ कर्कटस्थे वा आषाढ्यां वा नैयमा ऽऽचातुर्मासीयव्रतक्रिया आषाढस्य शुक्ल
एकादश्यां मासाद्धे शुक्ले मार्यो वा कर्कसंक्रांतौ वा प्रातःकाले कृतस्नानादिः स्वाम्नुपा ऽऽचमनाद्यं
ॐ भगवन्सूर्य भगवतो देवताः ऽद्यादिमासचतुष्टयं यावन्मांसभक्षणानिवृत्तिव्रतमहमा
चरिष्यामीति निवेद्य ॐ कीर्त्यायुर्यशोबलप्राप्तिकामो ऽद्यादिमासचतुष्टयं यावन्मांसभक्ष
णानिवृत्तिव्रतमहं करिष्ये वर्षं मांसं परित्यज्य वर्जयित्वा पुमान्मांसमसञ्जातगोप्रदो भवेत्
तद्धेतुममसङ्कल्पयामि सोऽश्वमेधफलं लभेत् अहिंसाव्रतमित्युक्तं कल्पान्ते भूपतिर्भवेत् ॐ भ
गवन्सूर्य भगवतो देवताः ऽद्यादिवर्षं यावन्मांसभक्षणानिवृत्तिव्रतमहमाचरिष्यामीति नि
वेद्य ॐ अश्वमेधफलप्राप्तिकल्पान्ते भूपतित्वकामो ऽद्यादिवर्षं यावन्मांसभक्षणानिवृ
त्तिव्रतमहं करिष्ये व्रतान्ते ब्राह्मणाय गौर्हेमरूप्यघटितमङ्गदेयः तत्रवाक्यं
ॐ अद्य कृतवर्षावच्छिन्नमांसभक्षणानिवृत्तिव्रते इमां गां रुद्रदैवतां इमं हेमं मङ्गं च

विष्णुदैवतमस्मकं मेवाचारान्करिष्ये तो यावन्तान्यनुज्ञामर्हसि प्रदेहि । ॐ स्वस्तीति प्रतिवच
नं दद्यात् गणदानानन्तरं स्वस्त्ययनं यावत्स्त्रीणां मांसपरित्यागे मासि मासि श्रमणे दीनयोग्यपैत्रप्रा
तं समाः नवाटयति यो मांसं सम्यक् न शुद्धिरिह कश्चांचित्रियो पृ तन्त्रान्नादि प्रातः काले
ताम्रपात्रमादाय ॐ भगवन्सूर्य भगवन्तो देवताभ्याः दियाव व्रतवां मांसभक्षणानिवृ
त्तिव्रतमहं समाचरिष्यामीति निवेद्य ॐ ग्रहनक्षत्रावच्छिन्न प्रतिमासमासे क्षयरत्नजनाघु
यारसमपत्नसप्रातिकामो यादियाव र्तीवे मांसभक्षणानिवृत्तिव्रतमहं करिष्ये इत्युक्त्वा सर्वत्र
मांसनिवृत्तौ पृजादिकं व्रतधर्मोनास्तीति समयप्रदीपः अथैकभक्तव्रतं महाभारते पौ
र्णमासीममावास्यामेकभक्तं समाचरेत् तत्रैकभक्तं कुर्वाणाः पुण्यां गतिमवाप्नुयात् कृ
तस्नानादिः प्रातः काले पूर्णिमायां ॐ भगवन्सूर्य भग॰ वन्तो देवता इत्याति प्राप्तिका
मोद्य दियाव र्तीवं पौर्णमासी प्रभृतमावास्यां चैकभक्तव्रतमहं करिष्ये चैत्रादिमासैक
भक्तव्रते महाभारते चैत्रं तु नियतो मासमेकभक्तेन यः क्षिपेत् सुवर्णमणिमुक्ता

व्याप्येकभक्तेन तरभोजननिवृत्तिव्रतमहं करिष्ये आषाढे आषाढमेकभक्तेन स्थित्वा मास
मन्ते द्विजः बहुधान्यो बहुधनो वर्द्धमानश्च जायते आषाढस्य कृष्णप्रतिपदि पूर्ववन्निवेद्य
ओं बहुधान्यधनवत्त्ववर्द्धमानत्वप्राप्तिकामो व्याप्तिआषाढमासं व्याप्येकभक्तेन तर भोजननिवृ
त्तिव्रतमहं करिष्ये श्रावणे श्रावणं नियमो मासमेकभक्तेन यः क्षिपेत् यत्र तत्राभिषेके
ण पूज्यते ज्ञातिभिर्द्धनैः श्रावणस्य कृष्णप्रतिपदि पूर्ववन्निवेद्य ओं यत्र तत्राभिषेकज्ञा
तिधनभोगकामो व्याप्ति श्रावणमासं व्याप्येकभक्तेन तरकालभोजननिवृत्तिव्रतमहं क
रिष्ये भाद्रे प्रोष्ठपदं यो मासमेकाहारी भवेन्नरः गवाढ्यं स्फीतमचलमैश्वर्यं प्रति
पद्यते पूर्ववन्निवेद्य ओं गवाढ्यस्फीताचलैश्वर्यप्राप्तिकामो व्याप्ति भाद्रपदमासं व्या
प्येकभक्तेन तरकालभोजननिवृत्तिव्रतमहं करिष्ये आश्विने ये पि चाश्वयुजं मासमेक
भक्तेन क्षिपेत् नरः जीवो वाहनाढ्यश्च बहुपुत्रश्च जायते आश्विनस्य कृष्णप्रतिपदि पूर्व
वन्निवेद्य ओं जीववत्त्ववाहनाढ्यत्वबहुपुत्रप्राप्तिकामो व्याप्तिआश्विनमासं व्याप्येक

दकुले महति जायते चैत्रशुक्लप्रतिपदि पूर्ववत्ताम्रपात्रमादाय ॐ भगवन् सूर्य भगव
त्सो देवताऽयाहि चैत्रमासमारभ्यैकभक्तेतरभोजननिवृत्तिव्रतमहमाचरिष्यामीति नि
वेद्य ॐ सुवर्णमालिन् नमः सुकायमहाकुलजन्मकामोऽभ्याहि चैत्रमासमारभ्य एकभक्तेतरभो
जननिवृत्तिव्रतमहं करिष्ये वैशाखे स्कन्दपुराणे वैशाखे यः क्षिपेन्मासमेकभक्तेन मान
वः स याति श्रेष्ठतां लोके स्त्रिजितो धनवानपि वैशाखशुक्लप्रतिपदि प्रातःकाले पूर्वव
त्ताम्रपात्रमादाय ॐ भगवन् सूर्य भगवत्सो देवताऽयाहि वैशाखमासमारभ्य एकभक्ते
५६४ तरभोजननिवृत्तिव्रतमाचरिष्यामीति निवेद्य ॐ जातिश्रेष्ठता लोके पूजितधनवत्ता का
मोऽयाहि वैशाखमासमारभ्यैकभक्तेतरभोजननिवृत्तिव्रतमहं करिष्ये ज्यैष्ठे ज्यैष्ठम
ल्लोलयो मासमेकभक्तेन संक्षिपेन्नरः ऐश्वर्यमतुलं श्रेष्ठं पुमान्स्त्री वापि गच्छति ज्यैष्ठशु
क्लप्रतिपदि ॐ भगवन् सूर्य भगवत्सो देवताऽयाहि ज्यैष्ठमासमारभ्यैकभक्तेतरभोजन
निवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ श्रेष्ठातुले ऐश्वर्यकामोऽयाहि ज्यैष्ठमासं

व्रतमहमाचरिष्यामीति निवेद्य ॐ श्रीमत्कुलनन्दिनो नरमहत्वप्राप्तिकामोऽद्यादि माघमा
गवन्सूर्य भगवद्विष्णुदेवता धार्मिकवस्त्रप्राप्तिकामोऽद्यादि पौषमासे ख्याप्यैकभक्तेन तरभोजननिवृ संख्याप्यै
त्तिव्रतमहं करिष्ये माघे माघंतु नियतो मासमेकम्भक्तेन यः । विप्राय श्रीमत्कुलदेवतानां मह कभक्तेन
तेनोपपद्यते माघस्नानप्रतिपादितं तं त्वामुपात्रमादाय ॐ भगवन्सूर्य भगवद्विष्णुदेवता रभोजननि
ऽद्यादि माघमासं ख्याप्यैकभक्तेन तरभोजननिवृत्तिव्रतमहं करिष्ये फाल्गुने एकभक्तं वृत्ति॰४
कुर्वाणाः फाल्गुने मासि नियताः स्त्रीषु सौभाग्यमाप्नोति तेषु परमप्रियाः फाल्गु
नस्नानप्रतिपादितामुपात्रमादाय ॐ भगवन्सूर्य भगवत्योऽदेवताऽद्यादि फाल्गुनमा
सं ख्याप्यैकभक्तेन तरभोजननिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ ह्रीं विषयिक
सौभाग्यपरमप्रियवस्त्रीप्राप्तिकामोऽद्यादि फाल्गुनमासं ख्याप्यैकभक्तेन तरभोजन
निवृत्तिव्रतमहं करिष्ये वर्षैकभक्ते यस्तु संपूर्णमेकाहमेकाहारो भवेन्नरः । श्रुति
रात्रस्य यज्ञस्य फलसमं समश्नुते दशवर्षसहस्राणि स्वर्गलोके महीयते तत्त्वयदि
कृच्छ्रगतमाहात्म्यं प्रतिपद्यते मन्त्रपुराणो संवत्सरे त्वेकभक्तप्रीतिभक्तजनकं

भक्तेतरभोजननिवृत्तिव्रतमहं करिष्ये कार्त्तिके कार्त्तिकं त्वपि यो मासमेकभक्तेन संक्षिपे
त् सोऽश्वमेधफलं प्राप्य वह्निलोके महीयते अत्र कार्त्तिकमासः सौरः श्रीपुरुषसंप्रदायः
कार्त्तिकसंक्रान्तिक्रमेण प्रथमदिने पूर्ववत् ॐ भगवन् सूर्य भगवत्यो देवताः इत्यादि
कार्त्तिकमासं व्याप्यैकभक्तेतरभोजननिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ अश्व
मेधफलप्राप्तिपूर्वकवह्निलोकमहितत्वकामोऽद्यादि कार्त्तिकमासं व्याप्यैकभक्तेतर
भोजननिवृत्तिव्रतमहं करिष्ये मार्गमासे एकभक्तेन यो देवो मार्गमासं क्षिपेन्नरः
स तेन कर्मणा युक्तः शुभगो भवति सर्वतः देवाः इति संबोधनं मार्गशुक्लप्रतिपदि
पूर्ववत्स्नात्वा मृणा [illegible] मादाय ॐ भगवन् सूर्य भगवत्यो देवताः इत्यादि मार्गमासं व्याप्यैक
भक्तेतरभोजननिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ सर्वतः शुभगत्वकामोऽद्या
दि मार्गमासं व्याप्यैकभक्तेतरभोजननिवृत्तिव्रतमहं करिष्ये पौषे पौषं मासमेतं तु
योऽश्न [illegible] पौषशुक्लप्रतिपदि मार्गशीर्षवत्सर्वं निवेद्य ॐ भ

व्र॰प॰
२७

कररणकामुक लोकमानिकामो ऽस्यातिथि यावज्जीवं प्रतिदिनमेकभक्तेन रम्भोजननिवृत्तिव्रतमहं
करिष्ये मूलफलाद्याहारे फलमूलादिभिर्नोर्ज्यं स्कं ऽंपर्णादिभिर्नामभवेत् पयोभक्षणोदवेधा
तिस्थानेन द्विगुणाधिकं ॰ तद्वत् वर्षं यावज्जीवं इति स्थानेन द्विगुणाधिकं ओं भगवन्
त्सूर्य भगवतो देवता ऽद्यादिया वज्जीवं फलमूलेतराहारनिवृत्तिव्रतमहमाचरिष्यामी
तिनिवेद्य ओं राज्यप्राप्तिकामो ऽस्यादि यावज्जीवं फलमूलेतराहारनिवृत्तिव्रतमहं क
रिष्ये पर्णाशने पूर्ववत्तामपात्रादिकमादाय ओं भगवन् सूर्य भगवतो देवता ऽद्यादि
पर्णेतराहारनिवृत्तिव्रतमहमाचरिष्यामीतिनिवेद्य ओं स्वर्गप्राप्तिकामो ऽद्यादि यावज्जी
वं पर्णेतराहारनिवृत्तिव्रतमहं करिष्ये दुग्धाहारे पूर्ववत्तामपात्रादिकमादाय ओं भग
वन् सूर्य भगवतो देवता ऽद्यादि यावज्जीवं पयोतिरिक्ताहारनिवृत्तिव्रतमहमाचरि
ष्यामीति निवेद्य ओं स्वर्गप्राप्तिकामो ऽद्यादि यावज्जीवं पयोतिरिक्ताहारनिवृत्तिव्रत
महं करिष्ये पाकाहारे गवाद्यः शाकादीनामिः स्वर्गमर्गोत्तमादिभिर्वा पूर्ववन्निवेद्य ए॰म॰ २४

भद्रः शिवलोके बहून्कल्पं प्राप्तिप्रतमिदं स्मृतं ॥ कस्मांचित्तिथौ कृतस्नानादिः प्रातःका
ले पूर्ववन्नामरूपा चमादाय ॐ भगवन्सूर्य भगवत्यो देवताः स्यादि वर्षमेकं यावदेकभक्तेनत्तर
भोजननिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ अद्य तिथौ त्रयज्ञजन्मफलसमफल दश
वर्षसहस्रावच्छिन्नस्वर्गलोकमहितत्वतरनंतरं मैहिकमाहात्म्यप्राप्तिकामो यादिवर्ष
मेकं यावदेकभक्तेनत्तरभोजननिवृत्तिव्रतमहं करिष्ये ॥ अथवा कल्पावच्छिन्नशिवलोक
वासकामो यावदीत्यादि सर्वे स्मिन्सतरं भक्तसहितजलकुंभं दद्यात् ॥ तत्र वाक्यं ॐ अद्ये
कवर्षैकभक्तव्रतं कुर्वाणः सभक्तजलकुंभं शिवदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्म
णाय तुभ्यमहं संप्रददे ॥ ॐ स्वस्तीति प्रतिवचनं ॥ दक्षिणां सुवर्णदानानंतरं वाक्यं
यावज्जीवैकभक्ते यः तिष्ठेदेकभक्तेन यावज्जीवं नरोत्तमः ॥ विमानेनार्कवर्णेन स्वर्गं गच्छे
च्छक्रलोकतां ॥ कस्मांचित्तिथौ ॐ भगवन्सूर्य भगवत्यो देवताः स्यादि यावज्जीवं प्रति
दिनमेकभक्तेनत्तरभोजननिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ अर्कवर्णविमान

महमाचरिष्यामीति निवेद्य ॐ कौवेरलोकप्राप्तिपूर्वकपरमपदप्राप्तिकामो ऽयादि प्रतिमासं त्रिरात्रोपवासव्रत ४५

समयप्रदीपः पूर्ववत्स्नात्वा पात्रमादाय ॐ भगवन् सूर्य भगवतो ऽनन्तास्यादि प्रतिमासमेकोपवास
व्रतमहमाचरिष्यामीति निवेद्य ॐ विष्णुत्वधार्मिकत्वप्राप्तिकामो ऽयादि प्रतिमासमेकोपवासव्र
तमहं करिष्ये यावज्जीवं प्रतिमासं त्रिरात्रोपवासे मासे मासे तु यः कुर्यात् त्रिरात्रं तपसंयुधः कौ
वेरलोकमासाद्य विन्दते परमं पदं स्नानपात्रादिकमादाय ॐ भगवन् सूर्य भगवतो देवतास्यादि
प्रतिमासं त्रिरात्रोपवासव्रतमहं करिष्ये द्वादशवर्षं त्रिरात्रोपवासे मासि मासि त्रिरात्रेण कृ
त्वा वर्षाणि द्वादश गाणपत्यमवाप्नोति निःसपत्नमकण्टकं ॐ भगवन् सूर्य भगवतो देव
ता ऽस्यादि द्वादशवर्षाणि यावत् प्रतिमासं त्रिरात्रोपवासव्रतमहमाचरिष्यामीति निवेद्य
ॐ अनाविलानिःसपत्नगाणपत्यप्राप्तिकामो ऽयादि द्वादशवर्षाणि यावत् प्रतिमासं त्रिरा
त्रोपवासव्रतमहं करिष्ये एकान्तरव्रतमाह यस्तु संवत्सरं पूर्णं चतुर्थं भागमश्नुते अहिं
सानिरतो नित्यं सत्यवाग्नियतेन्द्रियः वाजपेयस्य यज्ञस्य फलं वै प्राप्नुते नरः त्रिंशद्वर्षस
हस्राणि स्वर्गलोके महीयते कस्मिंश्चिद्दिने प्रातःकाले कृतस्नानादिस्नानपात्रमादाय

ॐ भगवन्त्सूर्य भगवत्तोऽद्य तास्थ्याद्दियावज्जीवं एकाकाऽतिरिक्ताहारनिवृत्तिव्रतमहमा
चरिष्यामीति निवेद्य ॐ गवाद्याव प्राप्तिकामोऽद्यादियावज्जीवं शाके तराहारनिवृत्तिव्र
तमहं करिष्ये तराहारे पूर्ववत्कृत्वा ॐ भगवन्त्सूर्य भगवत्तोऽद्य तास्थ्याद्दियाव
ज्जीवं तत्र तराहारनिवृत्तिव्रतमहमाचरिष्यामीति निवेद्य ॐ स्वर्गप्राप्तिकामोऽद्यादि
यावज्जीवं तत्तो तराहारनिवृत्तिव्रतमहं करिष्ये एवमेकभक्तादिव्रते पूर्णनिवृत्ति
रत्याचारात् सर्वोपवासव्रतानि तत्रैकाहोरात्रमुपवासे अहोरात्रं तत्परो ठवः कुर्यादे
केन रोत्तमः दशानामपि स्ववर्णानां फलं प्राप्नोति शोभनं देवः इति संबोधने कस्मिं
श्चिद्दिने प्रातःकाले पूर्ववत्सर्वं कृत्वा ॐ भगवन्त्सूर्य भगवत्तोऽद्य तास्थ्योपवासव्र
तमहमाचरिष्यामीति निवेद्य ॐ अयदश स्ववर्णादानजन्यपुण्यसमफलप्राप्तिका
मउपवासव्रतमहं करिष्ये यावज्जीवं प्रतिमासे कोपवासे मासे मासे त्वहोरात्रं चेयः क
रोति नरोत्तमः एतेन कर्मणा पुत्रो विद्वान्भवति धार्मिकः एतद्व्रतं यावज्जीवमिति

व्र॰प॰
२६

महमाचरिष्यामीति निवेद्य ॐदेवदानवलोकपूर्वकस्वर्गावस्थानकामः आदिपद्मेकं मासोपवासव्रतं२
कस्मिंश्चिद्दिने ताम्रपात्रादिकमादाय पूर्ववत् ॐभगवन्सूर्य भगवत्योदेवताः आदिपद्म
मेकं मासोपवासव्रतमहं करिष्ये मासोपवासे यस्तु मासे लिप्स्ये ईरो जितक्रोधो जितेन्द्रियः
विमानेन सदिव्येन अप्सरोभिः समन्वितः स्वर्गलोके सुवसते बहून्यकल्पतानि च न
तो ब्रह्मसमं प्राप्य ब्रह्मणा चानुपूजितः ब्रह्मलोके निवसते यथा देवो नरोत्तमः कस्मिंश्चि
द्दिने प्रातःकाले ताम्रपात्रमादाय ॐभगवन्सूर्य भगवत्योदेवताः आदिमासमेकं मा
सोपवासव्रतमहमाचरिष्यामीति निवेद्य ॐदिव्यविमानकरणाकाम्भः साहित्यवद्
रूपतावच्छिन्नस्वर्गलोकवासानन्तरब्रह्मस्थानप्राप्तिपूर्वकब्रह्मानुपूजितत्वेद ब्रह्म
लोकनिवासकामो आदिमासमेकं मासोपवासव्रतमहं करिष्ये पक्षान्तरेणापवोप
वासमासोपवासानाह मत्स्यपुराणे पक्षोपवासी यो दद्याद्विप्राय कपिलाद्वयं ब्रह्म
लोकमवाप्नोति सदेवासुरपूजितः कल्पान्ते राजराजः स्यात् समाश्रितमिदं स्मृतं मा
सोपवासी यो दद्याद्धेनुं विप्राय शोभनां सवैष्णवं पदं याति व्रतमिदं स्मृतं २२७ २६

ॐभगवन्सूर्यभगवतोदेवताप्रत्यादिसंवत्सरंयावत्प्रतिचतुर्थान्नकालेतरभोजननिवृत्ति
व्रतमहमाचरिष्यामीतिनिवेद्य ॐवाजपेययज्ञजन्यफलसमफलप्राप्तित्रिंशद्वर्षसहस्राव
च्छिन्नस्वर्गलोकेमहितत्वकामोऽद्यादिसंवत्सरंव्याप्यप्रतिचतुर्थान्नकालेतरभोजनानि
वृत्तिव्रतमहंकरिष्ये अहिंसासत्यनियतेन्द्रियस्त्वमज्ञांगं षष्ठान्नकाले षष्ठेकालेतुकौं
तेयनरः संवत्सरंतथा: अश्वमेधस्ययत्तस्यफलंप्राप्नोतिमानवः चक्रवाकप्रयुक्तेनवि
मानेनसगच्छति चत्वारिंशत्सहस्राणिवर्षाणिदिविमोदते कस्मिंश्चिद्दिनेप्रातःकाले
ॐभगवन्सूर्यभगवत्प्रीदेवताऽप्यादिसंवत्सरंयावत्प्रतिषष्ठान्नकालेतरभोजननि
वृत्तिव्रतमहमाचरिष्यामीतिनिवेद्य ॐअश्वमेधयज्ञजन्यफलसमफलप्राप्तिचक्रवा
कप्रयुक्तविमानकरणकगमनचत्वारिंशत्सहस्रावच्छिन्नस्वर्गाधिकरणकमोदनका
मोऽद्यादिवर्षंव्याप्यप्रतिषष्ठान्नकालेतरकालभोजननिवृत्तिव्रतमहंकरिष्ये पक्षोपवा
से अर्द्धमासंक्षिपेदस्तुनित्यमेवपरोहितः देवराजेनतुल्योसौभूत्वास्वर्गेचतिष्ठति

ऽऽविव्रतमो पेयपिदानेऽप्युपोऽभ्यासतेनपरयुपवासरूपमेवव्रतं तत्र दानं तु तस्यो देशंग
मितिसंप्रदायः निर्वहि भिक्षुपवासव्रतप्रकरणेऽभिलिखितत्वात् तत्रपक्षोपवासी क
स्यचिन्निथौ ताम्रपात्रादिकमादाय ॐ भगवन् स्वर्थं भगवतो देवताभ्याद्युपसंख्यो
पवासव्रतमहमाचरिष्यामीतिनिवेद्य ॐ अद्यमेलाकप्रातिदेवासुरपूजितत्वकस्तां ताधि
करणाकरणे राजत्वप्राप्तिकामो व्याधिपक्षोपवासव्रतमहं करिष्ये इतिसंकल्पं कुर्यात् तत्र
तोतकपिलाद्वयदानं तत्रवाक्यं ॐ अद्यकृतैतत्पक्षोपवाससंगतासिद्ध्यर्थमिदं कपि
लाद्वयं रुद्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॐ स्वस्तीति
प्रतिवचनं दक्षिणादानानन्तरं व्रतं मासोपवासे पूर्ववत्ताम्रपात्रमादाय ॐ भगव
न् सूर्य भगवतो देवताभ्याद्युपसंख्यत्वरूपमासोपवासव्रतमहमाचरिष्यामीतिनिवेद्य ॐ
देसव पदगमनकामनयाद्यादिव्रतात्त्वरूपमासोपवासव्रतमहं करिष्ये अत्र [illegible] व्रता
तेधेनुदानं तत्रवाक्यं ॐ अद्यकृतैतत्मासोपवासव्रतोहमिमांधेनुं रुद्रदैवतामित्या

त्यादि दद्यांच। अथ चैत्रादिमासेषु कानिचित् कृत्यानि लिख्यन्ते। तत्र चैत्र शुक्लाष्टम्यां पु
नर्वसुयुक्तायां त्वामशोक हराभीष्ट मधुमास समुद्भव। पिबामि शोकसंतप्तो मामशोकं स
दा कुरु। इति मंत्रेणाशोककालिकाष्टकं पिबंति शोकाभावकामनया। इत्यशोकाष्टमी
चैत्र शुक्ल पंचम्यां श्रीपंचम्यां लक्ष्मी पूजायां ॐ अद्य चैत्र शुक्ल पंचम्यां लक्ष्मीकरिका
स्थलागाभावविशिष्टलोकगतिकामनया श्रीपूजनमहं करिष्ये। इति संकल्प्य: ॐ श्रीं इहा
गच्छ इह तिष्ठेत्यावाह्य एतानि पाद्यार्घाचमनीयानि स्नानीय पुनराचमनीयानि ॐ श्रि
यै नमः। इत्यनेन प्रकारेण गंधपुष्पादिनैवेद्यैः श्रियमर्चयेत्। पुनः विसर्जयेत्। अथ
वैशाखकृत्यं तत्राचारादेव विषुवत्संक्रांतौ घटदानं कुर्वंति। तत्र प्रकारः संक्रांति
पुण्यवेलायां नूतनं कलशं वारिपूर्णं उपस्थितेनाभ्यर्च्य एष धर्मघटो दत्तो ब्रह्मविष्णु
शिवात्मकः अस्य प्रदानात्सकलं मम सन्तु मनोरथाः। इति श्लोकं पठित्वा जलेन धर्म
घटं सितका ॐ अद्य विषुवद्विसंक्रान्तौ स्वर्गप्राप्तिकामो ऽमुकगोत्र शर्मा धर्मघटं प्र २२

त्मविस्तृदेवतप्रियवात्मकं विस्तृदेवतेयध्यानाम गोत्रः ॥ द्वादश्यामहत्त्वमुक्तं जैन
उत्तिकं फलमितरेन्स जैन ॥ पट्टिमासंख्याभारी यत्नेनदाः इदेवाकं ॐ स्वर्गप्राप्तिकामोद्या
दिमासंख्याभ्यप्रत्यहं घटपरिमितजलेनवरुणं देवतंयध्यानाम गोत्रायतर्पयामि ॥ अथावधू
त्वोपान तत्र विधिः ॥ वैशाखशुक्लतृतीयायामुपोष्य वासुदेवमभ्यर्च्य जलैः तानेव
हुत्वापापेभ्यो मुक्तो भवति ॥ तत्रजन्मन्यमलिहनिस्यादफलमाप्नोति ॥ तत्रद्वि
तीयाममुपोष्य तृतीयायां पूर्वाह्ने कृतस्नानादिराचान्तः ॐ अद्य अमुकगोत्रः पापक्षयकामो
ऽहं तैर्वासुदेवप्रजनमहं तज्जहोममहं करिष्ये ॥ इति संकल्पः ॥ अत्राचलतपदेनपूजाः
स्तेयाः ॥ श्रीवासुदेवपूजानन्तरमेवतत्कर्तव्यम् ॥ यवैरेव वासुदेवस्योद्देश्य होमः कर्तव्यः ॥
यवदानेविस्तृधर्मोत्तरे ॥ वैशाखशुक्लपक्षेतु तृतीयायांद्विजोत्तमः ॥ यवदत्वाति
नरश्चैव तदक्षयफलमश्नुते ॥ विशेषेणात्यधानमन्नतानां महाफलं ॥ अत्रतानां
यवानां कृतस्नानादिः पूर्वाह्णे यवान्नं एव ॥ ॐ अद्य वैशाखशुक्लतृतीयायां

अतिशयितात्क्षयायवदानफलप्राप्तिकामनयाएतान्यवान्विष्णुदैवतान्यथानामगोत्रायब्राह्मणायसंप्रदा
तुमहमुत्सृजेत् इतिद्वयोर्यवदाने ॐ मद्यवैशाखशुक्लतृतीयायांअक्षय्ययवदानफलप्राप्तिकामनया
इदं यवविष्णुदैवतमित्यादि धर्मघटदाने देवीपुराणे तृतीयायांतु वैशाखे रोहिण्यां तु प्रपूजयेत् उदकुं
कृ कुंभप्रदानेन ब्रह्मलोके महीयते रोहिणीनक्षत्रयोगे देवीं प्रपूज्य एतद्घटदानेन ब्रह्मलोकफलं तत्र वाक्यं
अद्य वैशाखशुक्लद्वितीयायां रोहिणीयुक्तायां ब्रह्मलोकमहत्त्वप्राप्तिकामनया इदमुदककुंभं विष्णु
दैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजेत् यदा रोहिणी न भवति तदा च स्वर्गप्राप्तिकामन
याएवं विसृज्य प्रकारेण दद्यात् तथा वारिदानप्रशस्तं च मोदकानां तथैव च वैशाखमासि राजेंद्र
तृतीयायां चंदनस्य च वारिणां तु प्रदाने देवी मोदकैर्भवपदं वच दानात्तु चंदनस्य च कंजजो नात्र संशयः तृ
तीयायां तृतीयायामित्यर्थः कंजजो ब्रह्मा तत्र वाक्यं ॐ मद्य वैशाखशुक्लतृतीयायां गौरीप्रीतिका
मनयाइदं वारि यथानामगोत्रायेत्यादि भवप्रीतिकामनयाएतानि मोदकानि ब्रह्मप्रीतिकामनया २८

पृ॰ प॰
३०

एतानिपाद्यादीनि यशोदायैनमः एवं गंधपुष्पादिनाऽर्चयेत् ॐ देवकि इहागच्छ इहाति
ष्ठेत्यावाह्य ३४

कुष्माण्डायनमः ततः पुष्पैः ॐ कुष्माण्डायनमः इति वारत्रयं पूजयेत् एतानि गंधपुष्पधूप
तांबूल ४ दीपनैवेद्यानि ॐ कुष्माण्डायनमः यथासंभवं यज्ञोपवीतवस्त्रे दद्यात् ॐ यशोदे इहाग
आचार्य दुर्गा च्छ इहातिष्ठेत्यावाह्य ४ ॐ एतानिपाद्यादीनि यशोदायैनमः एवं गंधपुष्पादिनाऽर्चये
पूजायि ॐ त् नैवेद्यादीनि मंडुकापूपपायसदुग्धदधि नानाविधभक्ष्याणि दद्यात् रात्रौ च नृत्य
भगवति दुर्गे गीतसमाकुलं जागरणं कर्तव्यं अर्घ्यदानं चंद्रोदये तस्यां ॐ भगवन् कृष्ण नमस्ते यशो
इहागच्छ इह दे नमस्ते देवकि नमस्ते भगवति दुर्गे नमस्ते इति विसर्ज्य सौहार्द्रा जलाशा
तिष्ठेत्यावाह्य ये प्रतिमाः संप्रेषितव्याः स्त्रीभिः स्नाताः गृहमागत्य ऐन्द्रवमधुघृतमरिचस
एवं गंधपुष्पा हितयवान्नेन पारणा कर्तव्या यदि व्रतं यस्मिन् दिने उदयगामिनी अष्टमी प्राप्य
दिना पूजये ते तस्मिन् दिने कर्तव्यं रोहिणी प्रकर्षमात्रं रोहिणीचयदापरेकृष्णाष्टम्यांक्षि
त् ४ जो ह्रमः जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिः यस्यां सा यस्य कौमारे यौ।

वाक्यमन्त्रमाचरेत् ब्रह्मपुराणे अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे अष्टाविंशति
मे जातः कृष्णोसौ देवकीसुतः भारावतारणार्थाय क्षत्रियाणां क्षयाय च तस्मात्तत्र सं
पूज्यो यशोदा देवकी तथा गन्धैर्माल्यैस्तथा पुष्पैर्यवगोधूमसंभवैः भक्ष्यैरसैर्भक्ष्यभो
ज्यैः फलैश्च विविधैरपि रात्रौ प्रजागरः कार्यो नृत्यगीतसमाकुलः अरुणोदयवे
लायां नवम्यां च ततः स्त्रियः रक्तवस्त्रावृताः सर्वाः पुष्पमाल्यैरलंकृताः नयंति प्रति
मां तेषां नानाविभवसंभवाः नदीतीरे शुभे रम्ये विविक्ते वा महत्सरः तत्र स्नानं प्रकु
र्वंति स्नापयंति च तां ततः ततः प्रविश्य स्वगृहं यवान्नं भुंजते च ताः पुत्रमित्रवि
कारैश्च मध्वाज्यमरिचैः सह इदं व्रतं स्त्रीपुंसां सामान्याधिकारकमिति समयप्र
दीपे नित्यतयात्र संकल्पो नास्ति तत्र पूर्वाह्णे ॐ भगवन् कृष्ण इहागच्छ इहा
तिष्ठ आवाह्य एतानि पाद्यादीनि ॐ भगवते कृष्णाय नमः इदमनुलेपनं ॐ

व्र॰ प॰ कुंदपुष्पैः सुगंधिभिः उमापूजायां सौभाग्यं फलम् पूर्णिमायां तिलदानेनाश्वमेधयज्ञजन्यफलं वृषभस्यर
वेसर्वाभयकामैः शरीरबीजमेकं पातव्यं आषाढे भगवद्धारकं मच्छयनेमदुत्थानेमत्पार्श्वपरिवर्तने
२९ शाकमूलफलाहारी इदि शल्यममापैति शयने आषाढे पार्श्वपरिवर्तने भाद्रे उत्थाने कार्त्तिके आ
षाढशुक्लपक्षरविवारे हिंगुलकपूष्पलकमूलबंधनं सर्वविघ्नाभावकामनया आश्विनमासे कृ
ष्णपंचम्यां सुहृद्विदे विघ्नहरापूजा तिक्तकषायमधुराणां भक्षणं च कर्त्तव्यम् भाद्रमासि कृष्णपक्षे
चतुर्थ्यां बकुलापूजा बकुले इहागच्छ इह तिष्ठेत्यावाह्य एतानि पाद्यार्घ्याचमनीयानि बकुलादे॰ च॰
व्यै नमः अनेनैव प्रकारेण गंधादिदाने वत्सर इहागच्छ इह तिष्ठेत्यावाह्य एतानि पाद्यादीनि वत्सरा
य नमः अनेनैव प्रकारेण गंधादिः व्याघ्र इहागच्छ इह तिष्ठेत्यावाह्य एतानि पाद्यादीनि व्याघ्राय राम॰
नमः एवं गंधादिना पूजयेत् सोमिल्लगोपहितपर्वते च पूजयेत् बकुलाकथां श्रुत्वा विसर्जयेत् प २९

इदं चैतदनेनेत्यादिप्रकारः तथा योऽस्यां द्वादशि करकान् वारिधान्यसमन्वितान् सयाति पुरुषो वीरलोके
वैहेममालिनः करकान् कमंडलून् वारिपूर्णान् वारितोपरि निहित धान्यपूर्णभाजनान् हेममालोत्त
येः तत्र वाक्यम् ओमद्य वैशाखशुक्लतृतीयायां हेममालिलोकप्राप्तिकामनया ऽमान्करकान्
वारिधान्यसमन्वितान् यथानाम गोत्रायेत्यादि वैशाखशुक्लद्वादश्यां गोदाने वाराहपुराणे द
त्वातु गोसहस्राणि यत्फलं तु वसुंधरे दद्यादेकांतु द्वादश्यां सोपि तत्फलमश्नुते तत्र वाक्यं ओमद्य
वैशाखशुक्लद्वादश्यां एकगोसहस्रदानफलसमफलप्राप्तिकामनया इमां गां रुद्रदेवतां अमु
कगोत्रायेत्यादि स्वस्तीति प्रतिवचनं दक्षिणा च ओमद्य कृतैतद्गोदानप्रतिष्ठार्थमिदं हिरण्यमग्नि
देवतं अमुकगोत्रायेत्यादि स्वस्तीति प्रतिवचनम् मेषादित्ये निंबपत्रद्वययुक्तं मसूरपूर्णं वर्षव्याप
विषापहं ज्येष्ठमासे शुक्लचतुर्दश्यां उपदा[illegible]दि विधिने नैवेद्यगीतनृत्यवाद्यहोमैः पयोभिर्वैश्य

इत्यावाह्य एतानि पाद्यार्घ्याचमनीयानि स्नानीयान्नमः एवमेवं गंधादिना पूजयेत् गो
विंदपूजने ॐ भगवन् गोविंद इहागच्छ इहातिष्ठेत्यावाहनप्रकारः गोदुग्धनैवेद्यं
शर्करान्वितं कारयेदिति एषद्वमीयोगे विष्णुपूजनमतिप्रशस्तं एतद्व्रतीयमेव व्रतं यथा
मावास्यायां कुशोत्पाटनं तत्र कुशा अयातयामाः भाद्रशुक्लचतुर्थ्यां चंद्रदर्शने
नष्टफलं शुक्लपक्षे चतुर्थ्यां तु तिथौ चंद्रस्य दर्शनं मिथ्याभिशापं कुरुते तस्मात्त
द्दोषनाशं तथा ब्रह्मपुराणे भाद्रशुक्लचतुर्थ्यां चंद्रेन प्रमादाद्दृष्टमेयतः पठेद्धात्रेयि
कावाक्यं प्राङ्मुखो वाप्युदङ्मुखः धात्रेयिकावाक्यं विष्णुपुराणे सिंहः प्रसेनम
वधीत्सिंहो जांबवता हतः सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः भाद्रशुक्ला
ष्टम्यामाचारान्महालक्ष्मीव्रतं तत्राचारादेव पूजाप्रकारः संकल्पश्च तत्र
कृतस्नानादिः प्रातःकाले ॐ भगवन्सूर्य भगवत्यो देवता इत्यादि षोड

वने वार्द्धिके पि वा सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु तत्क्षालयति भूतेशस्त
स्यामभ्यर्च्यो शुद्धितः होमयज्ञादिदानानां फलं च यत्तन्मे नित्यं संप्राप्नोति नरो देहो
पश्चात्पुनर्न सेवितं उपवासं स्फुटं तत्रोक्तो महापातकनाशनः अथैव रोहिण्यष्टमी
योगः प्रायशोभाद्रकृष्णपक्षे भवति अन्यदापि यदि लभ्यते तदाप्येतदेव फलं वि
ष्णुधर्मोत्तरे तस्यामभ्यर्च्य भूतेशमित्यत्र गोविंदमिति पठितं अथ प्रयोगः
कृतस्नानादिः प्रातःकाले ॐ भगवन् सूर्य भगवत्यो देवताः अद्य रोहिण्यष्टम्यां
भूतेशपूजनोपवासव्रतमहमाचरिष्यामीति निवेद्य ॐ अद्य रोहिण्यष्टम्यां सप्त
जन्मावच्छिन्नबाल्यकौमारयौवनवार्द्धिककृतपापक्षयमानसेप्सितलाभमहा
पातकनाशनकामनया भूतेशपूजनोपवासव्रतमहं करिष्ये गोविंदपूजनो
पवासमहं करिष्ये इति वा संकल्पः तत्र ॐ भगवन् भूतेश इहागच्छ इहाति

मिमंत्रैः संपूज्य एतानिपूर्वोक्तैर्वेद्यानि ॐ इंद्रायनमः इतिवारत्रयं संपूज्य ततःप्रा
चिदृहागच्छइहतिष्ठेत्यावाह्य एतानिपाद्यादीनि ॐ शच्यैनमः एवं गंधादिनावारत्रयं
पूजयेत् एवंजयंतमपि पूजयेत् प्रत्येकंसप्तदिनानि पूजयित्वा सप्तमदिने ॐ भगव
न्निंद्र नमस्ते ॐ भगवति शचि नमस्ते एवं जयंतमपि पूजयेत् विसर्जयेत् प्रवाहका
के जलाशये इंद्रादीन्निःक्षिपेत् अथानंतरमनंतव्रतं भाद्रपदशुक्लचतुर्दश्यां कु
र्यात्स्नानादिशौचान्तः प्रातःकालेपूर्ववत्ताम्रपात्रमादाय ॐ भगवन्नस्मर्ये भगवत्पोद
वत्ताऽद्यादि चतुर्दश वर्षाणि यावत्प्रति भाद्रपदशुक्लचतुर्दश्यामनंतपूजनव्रतमहमा
चरिष्यामीतिनिवेद्य ॐ परमानंतप्रीतिपूर्वकैहिकवहुगोधनधान्यरत्नादिसत्व
कसंतानस्यापि पुनर्वंशस्तन्तुभवनकामनयाऽद्यादिचतुर्दशवर्षाणियावत्प्रति
भाद्रपदशुक्लचतुर्दश्यामनंतपूजनव्रतमहं करिष्ये इति संकल्पः पूजाप्रकारस्तु

प्रवर्षपर्यंतं यावन्महालक्ष्मीव्रतमहमाचरिष्यामीति निवेद्य ॐ उक्तपौत्रादि धर्मार्थकाममो
क्षप्राप्तिकामनया ऽद्यादि षोडशवर्षपर्यंतं यावन्महालक्ष्मीव्रतमहं करिष्ये इति संकल्पः
आश्विनकृष्णाष्टमीयावत्प्रत्यहं पूजा कथाश्रवणं च पूजाप्रकारः कथा च कथां
ग्रंथांतरे एव विद्यते अथेंद्रस्थापनकृत्ये भाद्रशुक्लाष्टम्यां दशांगुलं दूर्वादिनिर्मितां कु
इंद्रप्राचीजयंतान्स्थापयित्वा कृतस्नानादिरर्चयेत्ततः ॐ भगवन्निंद्र इहागच्छ इह
स्नानीयं तिष्ठ त्वावाह्य २ स्नानिपाद्यार्घाचमनीयं पुनराचमनीयानि ॐ भगवते इंद्राय न
मः इदमनुलेपनं इंद्राय नमः पूजामंत्रस्तु एह्येहि सर्वामरसिद्धसाध्यैरभिष्टु
तो वज्रधरामरेश संस्तूयमानस्त्वप्सरसां गणेन गृहाण पूजां भगवन्नमस्ते १ ऐरा
वतस्कंधारूढो वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै इंद्राय ते नमः २ व
ज्रहस्त सुराधिप सहस्रनेत्र पुरंदर रक्षार्थं सर्वलोकानां पूजेयं प्रतिगृह्यतां ३ ए

वृ.प.
३३

प्रवेशयेत् कद लीदाडिमीधान्यं हरिद्राम्लकं कन्तुः बिल्वाशोकौ जयंती च विज्ञेया नव
पत्रिकाः तत्कन्दे उपविश्य पञ्चजलपुष्पाक्षतफलाय ॐ आवाहयाम्यहं देवीं [illegible]
श्रीफले त्वया आयुरारोग्यमैश्वर्यं देहि देवि सदा मम कैलासशिखरे देवि विंध्याद्रौ हि
मपर्वतात् आगत्य बिल्वशाखायां मम गेहे कुरु संस्थिति इत्यावाह्य स्थापितासि मया देवि
विश्रम्य वृक्षे श्रीफले त्वया आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते ॐ ह्रीं दुर्गे दुर्गे रक्षिणि
स्वाहा इति मंत्रेणार्घं दत्वा ॐ ह्रीं दुर्गे दुर्गे रक्षिणि स्वाहा अनेन गंधपुष्पधूपदीपनै
वेद्यानि ॐ अमृतोद्भवश्रीवृक्षः शंकरस्य सदा प्रियः ततो दुर्गे प्रयच्छामि बिल्वपत्रं [illegible]रे
[illegible] यात् ब्रह्मविष्णुशिवादीनां [illegible] सदा प्रियं ततो दुर्गे प्रय
च्छामि सर्वकामार्थसिद्धये इति [illegible]पत्रं दद्यात् ततो वरप्रार्थनं रूपं देहि यशो देहि
भगं भगवति देहि मे पुत्रान् देहि धनं देहि सर्वान्कामान् प्रदेहि मे महिषघ्नि महा ३३
[illegible] पवित्रं तेन प्रयच्छामि बिल्वपत्रं सुरेश्वरी इति बिल्वपत्रं दद्यात् [illegible] ४२

पूजां ग्रंथेष्वेव अनन्तसंसारमहासमुद्रे मग्नानस्मानभ्युद्धरस्व वासुदेव अनन्तरूपविनियो
जयस्व अनन्तरूपाय नमोस्तु तस्मै पूजायां डोरककरबंधने चायं मंत्रः चतुर्दशव
र्षांते उद्यापनं कर्तव्यं अथाश्विनकृत्यं आश्विनशुक्लप्रतिपदे तु श्राद्धं कुर्याद्दिने दि
ने त्रिभागहीनं पदं वा त्रिभागमद्धेमेव वा मनुः कृष्णपक्षे दशम्यादौ वर्जयि
त्वा चतुर्दशीं श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः अत्र कुमारादिरेव मासः
आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पंचमः तत्र श्राद्धं प्रकुर्वीत कन्यां गच्छतु वा न
वा एतद्वाक्यं स्फुटमेवाभिधानात् युवानस्तु गृहे यस्मात्तेषां तद्दापयेत् स्त्रा
स्त्रेणाचहतानां च तेषां दद्याच्चतुर्दशीं चतुर्दश्यामितरेषां युवानस्तु षोडशव
र्षोपरि त्रिंशद्वर्षाणि यावत् अथ पत्रिकाप्रवेशः मूलपदे सप्तम्यां मृण्मयीं
दुर्गाप्रतिमां सफलां बिल्वशाखायां कदल्यादि नव पत्रिकां च मंगलादि नारदे

दु॰प॰
३४

लभते वीर द्वितिः व गतोऽर्चितः त्रिशूलदुर्गापूजायां ॐ ह्रां [illegible] सह स्वराजल
प्रयातप्रजना [illegible] फलप्राप्तिकामो महानवम्यां त्रिशूलिनिः दुर्गापूजनमहं क
रिष्ये इति संकल्पः [illegible] इहागच्छ इह तिष्ठ इत्यावाह्य एतानि पाद्यादीनि ॐ त्रि
शूलिन्यै नमः एवं [illegible] नापूजयेत् तथा च स्कांदे पद्मपुराणे नवमी पापसू
दिनी [illegible] सर्वपापैः उपवासे ॐ पापक्षयकामो महान
वम्यामुपवासमहं करिष्ये छागादिरुधिरदाने ॐ अद्येत्यादि [illegible] दुर्गाप्रीति
कामनया इदं मेषरुधिरं दुर्गादेव्यै अहं ददे छागरुधिरे [illegible] तिः [illegible]
[illegible] महिषरुधिरेण स्वदेहरुधिरेण [illegible] दशम्यामपराजितापू
जायां ॐ भगवति अपराजिते इहागच्छ इह तिष्ठ इत्यावाह्य एतानि पाद्यादीनि
ॐ अपराजितायै नमः ॐ क्रियाशक्त्यै नमः ॐ उमायै नमः इति त्रिभिर्मं ३४

भागेचाग्नेर्दिने दुर्गार्द्देनि हेमभावे गघमैश्वर्य्यं देहि देवि नमोस्तु ते इति प्रणामेन्न इति
पत्रिकाप्रवेशकृत्यं ॥ अथ महाष्टम्यां देवीपुराणे कन्यास्थे तु रवौ विशेषस्तु ह्लाष्टम्यां प्रपूज
येत् सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥ इषे आश्विने इत्यर्थः पूजयेद्देवीमिति
शेषः सप्तम्यवासो रात्रिपूजामप्यामेव छागमहिषादि वधश्चात्र दुर्गोत्सवे कृत्यानि
प्रशस्तः ब्रह्मपुराणे तत्राष्टम्यां महालक्ष्मीर्दैत्यवंशविनाशिनी प्रादुर्भूता महाघो
रा योगिनीकोटिभिः सह ॥ अतोऽर्थे पूजनीया सा तस्मिन्नहनि मानवैः उपोषितैर्बल्य
माल्यैर्धूपगन्धानुलेपनैः ॥ इति वाक्यानि दिने पूजितत्वामिषादिबहुविधनैवेद्यैः
पूजा आयुधस्थापनं च पूजा च सा च दुर्गापूजाविधिग्रन्थोल्लिखितानुसंधेया
महानवम्यां भविष्योत्तरे मासि चाश्विन्युजे वीर शुक्लपक्षे त्रिशूलिनी नवम्यां
पूजयेद्यस्तु तस्य पुण्यफलं शृणु ॥ अश्वमेधसहस्रस्य राजसूयशतस्य च यत्फलं

लके दर्शनफलं अन्येषु अनुगजवाजिमहोरगेषु राज्यप्रदः कुमालदः प्रविशाहु
रेषु भस्मास्थिनरोकिर्परे नामनवेषु दृष्टो दुःखदः दातिवहुमः खलुखेजरीटः अथै
कोजागरकृत्यं तत्र वीथिगृहाङ्गणमार्गसमीपमार्गप्रपरिष्कारस्कारणीयाः
शरीरं चंदनादिना मार्जनीयं स्त्रीबालवृद्धमूर्खांन्विहाय अन्यैर्दिवा भोजनं
न कर्तव्यं प्रदोषसमये द्वारोर्ध्वभित्तिहव्यवाहनइंद्रसभार्यचंद्रस्कंदनंदीश्वर
मुनीश्वरसुरभिनिकुंभलक्ष्मींद्रकुबेरा एते पूज्याः येषां मेषा भवंति ते वरुणः पू
ज्यः येषां हस्तिनो भवंति तैर्विनायकः पूज्यः येषामश्वा भवंति तैः स्कंदः पूज्यः
येषां गावः संति तैः सुरभिः पूजनीया अत्र प्रयोगः स्नातः सफलैः पात्रैः ॐ द्वा
रोर्ध्वभित्तिभ्यो नमः इति वारत्रयं गृहाभ्यंतर एव उपविष्टः पूजयेत् ततः ॐ ह
व्यवाहन इहागच्छ इह तिष्ठेत्यावाह्य एतानि पाद्यादीनि ॐ हव्यवाहनाय नमः 

त्रैरपराजितां प्रतिष्ठाप्य चतुर्भुजां पीतवस्त्रां सर्वाभरणभूषितां खड्गचर्मवरदाभ
यहस्तां त्रिनेत्रामीषत्सुहसितवदनां ध्यात्वा ॐ ह्रीं अपराजितायैनमः ॐ ह्रीं अपरा
यफट् इति पूजयेत् ततो दक्षिणे ॐ जयायैनमः इति पूजयेत् ॐ वामे विजया
यैनमः इति पूजयित्वा हरिद्रापीतवस्त्रेण दूर्वासिद्धार्थकं बध्वा हस्ते हृदि दत्वा
अभिलषितकामनया स्वांगे धारयेत् ततः ॐकारमुच्चारयन् प्रदक्षिणीकृत्वा
प्रमाणानेनमंत्रेण विसर्जयेत् इमां पूजां मया देवि यथाशक्त्या निवेदितां र
क्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमं ततः प्रणामं कुर्यात् इति रक्षाकोत्तमा०
राजितापूजा अत्रैव दिने भगवति दुर्गे दमस्वेति पूर्वस्थापितां देवीं पत्रि
कां विसृज्य स्रोतसीपत्रिकां जले क्षिपेत् हस्तार्के खंजनदर्शनं च:
नीलग्रीव खञ्जरूपेण सर्वकामफलप्रद पृथिव्यामवतीर्णोसि खंजरीट नमो

कृ॰ प॰
३२

वत्सरे देवतासाद्या दि कार्तिकमासं व्याप्य प्रतिरात्रि केशवसंप्रदास्ये आकाशस्थदीपदा
नव्रतमहमाचरिष्यामीति निवेद्य ॐ सर्वकुलोद्धरणपूर्वक विष्णुलोकावाप्ति
कामनया अद्यादि कार्तिकमासं व्याप्य प्रतिनिशमाकाशे दीपं विष्णवे प्रदद्यास्ये
अथवा ॐ धनधान्यसमृद्धिपुत्रपौत्रैश्वर्यत्वप्रभलोचनत्वविद्वत्वकामनया
द्यादिकार्तिकमासं व्याप्य प्रतिनिशमाकाशे दीपं केशवाय संप्रदास्ये इति
कल्पं कृत्वा राधापुत्र कर्मे विष्णुं संपूज्य ॐ दामोदराय नभसि तुलायां लोलया सह
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे इति पठित्वा एष दीपः ॐ विष्णवे नमः
इति दद्यात् द्वितीयवर्षे केशवं संपूज्य एष दीपः ॐ केशवाय नमः इति
दीपदानं एवं मासं यावत् तथा तुलायां तिलतैलेन सायं संध्यासमाग
मे आकाशदीपं यो दद्यान्मासमेकं निरंतरं यः श्रीकामः श्रीपतये सश्रिया

ॐ इंद्राय नमः इति वारत्रयं पुष्पेण पूजयेत् ततो धूपादि दत्वा विसर्जयेत् ततः
कुबेरं पूजयेत् ॐ कुबेर इहागच्छ इह तिष्ठ इत्यावाह्य एतानि पाद्यादीनि कुबेराय न
मः ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च भगवन् त्वत्प्रसादान्मे धनधान्या
दि संपदः कुबेराय नमः इति वारत्रयं पुष्पेण पूजयेत् ततो धूपादि दत्वा विसर्ज
इत्यादि ततो जागरणं ब्राह्मणानां बांधवानां च भोजनं अथ कार्त्तिककृत्यं गौडाः
उच्चैः प्रदीपमाकाशे यो दद्याद्धि सदैव नरः स सर्वं कुलमुद्धृत्य विष्णुलोकमवा
प्नुयात् कार्त्तिकेप्रकरणात् तथा यस्तु केशवमुद्दिश्य दीपं दद्यात्तु कार्त्ति
के आकाशस्थं जलस्थं च शृणु तस्यापि यत्फलं धनधान्यसमृद्धिस्तु पुत्रवा
नीश्वरो भवेत् लोचने च शुभे तस्य विद्वानपि च जायते कार्त्तिकसंक्रांति
क्रमेण प्रथमदिने प्रातःकाले कृतस्नानादिराचांतः ॐ भगवन्स्वरूप भग

येत् निकुंभ इहागच्छ इहातिष्ठ स्वाहा एतानि पाद्यादीनि निकुंभाय नमः एवं संपू
ज्य गंधपुष्पधूपदीपनैवेद्यतांबूलानि दत्वा इदं सामिषतिलतंडुलसघृतस्रगाविष्ट
पात्रादिकमन्नं निकुंभाय नमः ॐ निकुंभ क्षमस्वेति विसर्जनं ॐ लक्ष्मि इहाग
च्छ इहातिष्ठ स्वाहा एतानि पाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयानि ॐ ल
क्ष्म्यै नमः इदमनुलेपनं ॐ लक्ष्म्यै नमः ततः पुष्पेण ॐ नमस्ते सर्वभूतानां
वरदासि हरिप्रिये या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्चनात् ॐ लक्ष्म्यै नमः
इति वारत्रयं पूजयेत् एतानि गंधपुष्पधूपदीपनैवेद्यानि ॐ लक्ष्म्यै नमः ॐ
भगवति लक्ष्मि क्षमस्वेति विसर्जयेत् ॐ भगवन्निंद्र इहागच्छ इहातिष्ठ स्वाहा
एतानि पाद्यादीनि ॐ इंद्राय नमः इदमनुलेपनं इंद्राय नमः ॐ विचित्रै
रावतस्थाय भास्वत्कुलिशपाणये पौलोम्यालिंगितांगाय सहस्राक्षाय ते नमः

इदमनुलेपनं हव्यवाहनाय नमः पुष्पैर्वारत्रयं पूजयेत् एतानि गंधपुष्पधूपदी
पनैवेद्यादीनि ॐ हव्यवाहनाय नमः एतेऽक्षतयवघृतसहिततंदुलाः हव्यवाह
नाय नमः ॐ भगवन् हव्यवाहन क्षमस्वेति विसर्जयेत् ततश्चनेन कुंभेस्थावाह्य
स्थापयित्वा गंधादिकं दत्वा पूर्णाहुवारत्रयं पूजयेत् इदं दुग्धं पूर्णाहुत्यै नमः ॐ
भगवन् पूर्णाहुते क्षमस्वेति विसर्जयेत् ततः सभार्य्य रुद्रस्कंदनंदीश्वरमुनि
श्वरमिः पूजयेत् स्कंद इहागच्छ इहातिष्ठ स्वागतम् एतानि पाद्यादीनि ॐ
स्कंदाय नमः गंधपुष्पधूपदीपताम्बूलानि दद्यात् इति विसर्जनं ॐ नंदी
श्वरमुने इहागच्छ इहातिष्ठ स्वागतम् एतानि पाद्यादीनि नंदीश्वरमुनये नमः
इति वारत्रयं पूजयेत् एवं गंधपुष्पधूपदीपताम्बूल नैवेद्यानि दत्वा विसर्जे

प्रवृत्तिप्रातःस्नानमहं करिष्ये इति संकल्पः जितेन्द्रियत्वं ब्रह्मचर्यत्वं अधोशय
नः हविष्यभोजनं पर्णान्नत्वं हिंसादिनिवृत्तिरेतत्तु गौणानि मुख्यं त्वाच मांस
भोजननिवृत्त्यैकभक्तयोः सामान्यव्रतावसरे एकत्वं कथितमेव भविष्यपुराणे ब्रि
ताधिकारे यः कुर्यात्कार्त्तिके मासि शोभनां दीपमालिकां घृतेन च चतुर्दश्या
ममावास्यां विशेषतः यावद्दीपप्रसंख्या वै घृतेनाप्यवबोधिता तावद्युगसहस्रा
णि रुद्रलोके महीयते कार्त्तिकस्य चतुर्दश्याममावास्यायां वा बहुदीपान्प्र
ज्वाल्य तत्तद्दीपसमसंख्यायुगसहस्रावच्छिन्नरुद्रलोकमहितत्वकामो ग
ग्गादिकार्त्तिकस्य चतुर्दश्यामिमां दीपमालिकां शिवायाहं हरदेवे पतापित
पदञ्ज्वालयेन्न्यस्तं पार्वतीरूपं तेन कार्त्तिकामावास्यां कर्त्तव्यं यदाह येयं दीपा
न्विता राजन्त्र्यातायं च दर्शो भुवि तस्यां देयं नचेत्तु पित्र्येणां महालये पि

नविप्रुस्याने स्नात्वा विसंक्रान्तिक्रमेण कार्तिके दिने प्रातः काले ॐ भगवन् सूर्य भग
वतो देवताः याद्वित्तुलास्थे रवौ मासं व्याप्य प्रतिसायं संध्यामाकाशस्थ श्रीपति संप्र
दानक दीपदानमहमाचरिष्यामीति निवेद्य ॐ श्री वियोगाभावकामनया अद्या
दि तुलास्थे रवौ मासं व्याप्य प्रतिसायं संध्यामाकाशस्थदीपं श्रीपतये अहं दास्ये
इति संकल्पः सायंकाले पूर्ववत् तिलतैलेन दीपोदयः प्रत्यहमेवमंत्रः दा
नवाक्ये श्रीपतये इति विशेषः अथ प्रातः काल स्नानादिफलं कार्तिकेतक
लेमासं नित्यस्नायी जितेन्द्रियः जपन् हविष्यभुक् शान्तः सर्वपापैः प्रमुच्यते
नित्यस्नायी प्रातः स्नायी नित्यस्नानं प्रातः स्नानमिति वचनात् स्नानं प्रधा
नं जपादिकमंगं मासस्नायं स्नोरइति शिष्टसंप्रदायः तत्र सौरकार्तिकोप
क्रमेणाश्रुणोदयवेलायां ॐ सर्वपापहरणकामो याद्दिकार्तिकमासं व्या

द्रतिकारचयेद्भजयेत्। धूपादिकं दत्वा विसर्जयेत्। तथा दीपवृक्षाः प्रकर्तव्याः देवगृ
हे चतुष्पथश्मशाननदीतीरपर्वतवृक्षमूलगोष्ठचत्वरगृहेषु दीपाः प्रदातव्याः
हट्टभूमयः परिष्करणीयाः दीपमालापरिवृतस्यानेकब्राह्मणान्भोजयेत्। अलं
कृतैः स्निग्धबांधवैः सार्द्धं भोक्तव्यं रात्रौ शोभनायां शय्यायां भूषिताभिर्दयिताभिः
सह शयितव्यं नववस्त्रालिर्दत्तैर्भोज्यानि स्वयं च परिधातव्यानि प्रतिप
दि द्यूतं कर्तव्यं तस्मिन्द्यूते जयो यस्य तस्य संवत्सरः शुभः अत्रैवाचारात्वृष
भाणां मेषजलदानं कुर्वंति द्वितीयायां भगिनीहस्तेन भोजनं पुष्टिवर्द्धनं भ्रा
तृभिः भोजनानंतरं वस्त्रादिना भगिन्यः पूजनीयाः भगिन्यभावे भगिनीत्व
वस्थाप्य तद्धस्तेन भोक्तव्यं अक्षयनवम्यां दुर्गापूजा यो भविष्योत्तरे मासेश्व
नुर्मेयेत्तु प्रांपविधिना पूज्य चंडिकां तत्फलं लभते वीर नवम्यां कार्त्तिकस्य तु

न्रणां तु महालये उभाभ्यां श्रेयसि प्रदेनेचैव तु नित्यशः। श्रुणुवत्स विधानं त
त्र दिने बालान् वृद्धान् रोगिणांश्च विहाय केऽपि न भोक्तव्यं प्रदोषसमये लक्ष्मीं
पूजयेत् ततस्तमाचम्य गृहाभ्यन्तरे उपविश्य ॐ लक्ष्मि इहागच्छ इह तिष्ठेत्या
वाह्य एतानि पाद्यादीनि ॐ लक्ष्म्यै नमः इदमनुलेपनं ॐ लक्ष्म्यै नमः ततः पुष्पा
ॐ नमस्ते सर्वलोकानां वरदासि हरिप्रिये या गतिस्त्वत्प्रपन्नानां सा मे भूयात्वदर्च
नात् इति पठित्वा ॐ लक्ष्म्यै नमः इति वारत्रयं पूजयेत् एतानि धूपदीपवस्त्रा
णि लक्ष्म्यै नमः ॐ भगवति लक्ष्मि क्षमस्वेति विसर्जयेत् ततस्ताभ्यां प्रदोषे तु
कुवेरं पूजयन्ति ते तत्प्रकारः ॐ भगवन् कुवेर इहागच्छ इह तिष्ठेत्यावाह्य ए
तानि पाद्यादीनि ॐ कुवेराय नमः ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय
च भगवन् त्वत्प्रसादान्मे धनधान्यादि सम्पदः इति पठित्वा ॐ कुवेराय नमः

तदेहयामुपवासंकृत्वा पूर्णिमायां ॐ अद्य कार्त्तिकपूर्णिमास्यां अग्निहोमफलसमफल
प्राप्तिस्वर्गलोकगतिकामनया उमापूजनमहं करिष्ये इति संकल्पः ॐ उमे इहागच्छ
इहातिष्ठ त्वावाह्य ॐ उमायै नमः अनेनैव प्रकारेणोपचारैः पूजयेत् अमा
तिथौ सूर्यपूजाव्यातिफलात्स्नानदानादिकमतिप्रशस्तं अथ माघमासकृत्ये माघ
स्य शिशिरर्त्तौ प्राधान्यात् शिशिरऋतुस्नानमंत्रः विष्णुः यदीच्छेद्विपुलान्भो
गान् चंद्रसूर्यग्रहोपमान् प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ संक्रा
तिक्रमेण माघमासं प्रथमारुणोदयवेलायां ॐ चंद्रसूर्यग्रहोपमविपुलभोगप्रा
प्तिकामोऽद्याद्यमाघफाल्गुनमासौ व्याप्य प्रातःस्नानमहं करिष्ये स्नाने चैवेयं न
रसिंहपुराणे धौतकाले महावह्निं प्रज्वालयति यो नरः सर्वसत्वहितार्थाय स्वर्गे
मप्सरसैर्लभेत् माघमासीयप्रातःस्नाने स्वर्गभोगे चिरंवासो यामनसिवौ

ततोचोऽश्वमेधानिजन्मफलं द्वादश्यां हरिजागरणे वाराहपुराणे कौमुदस्य तु मासस्य
सितायां द्वादशीं भवेत् ॥ अर्चयेद्यस्तु मां तत्र तस्य पुण्यफलं शृणु । यावल्लोका
हि वर्तंते यावत्तं चैव माधवि मद्भक्तो जायते तावद् न्यभक्तो न जायते कृत्वा वै
मम कर्माणि द्वादश्यां मत्परो नरः मम वै बोधनार्थाय यद् मंत्रमुदीरयेत्
तथा एवं कर्माणि कुर्वंति द्वादश्यां ये यशस्विनः मम भक्ता नरश्रेष्ठास्ते यांति
परमां गतिं ॐ कार्त्तिकशुक्लद्वादश्यां यावल्लोकमवस्थान विष्णुभक्त्या प
रमगतिकामो विष्णुप्रजनमहं करिष्ये इति संकल्प्य विष्णुं पंचोपचारैः
संपूज्य ॐ ब्रह्मेंद्ररुद्रैरिति ॐ मेघागतानि मेले त्यादिमंत्रं चैकादश्यां लि
खितं पठेत् ततो विसर्जयेत् कार्तिकानुमापूजायां कार्तिके पौर्णमासेन
योपवासः स्वयं हुतं अग्निष्टोमफलं विंद्यात् सूर्यलोकं च गच्छति तत्रैव

गत्यैते त्वयार्चोद्यमानेन उषितं भुवनत्रयं तृतीयः श्लोकः हंसद्वावगतए
वस्त्राञ्च धूपदीपनैवेद्यादिवहुविधभक्ष्यभोज्यानि नानाविधफलानि च दा
डिम्बादीनि कुङ्कुमतुलसीमञ्जरीभिः जातीपुष्पैश्च कर्त्तव्या नृत्यगीतवहुविध
वाद्यवाद्यैस्तदेवकथामृतकालेवैश्च प्रबोधनं एकादशीप्रभृतिदिनपंचकमपि
मांसपरित्यागः कर्त्तव्यः ब्रह्मपुराणे तद्दिनपंचकमध्ये कृत्स्नदेशाच सर्वभ
नैर्भोजनैरेत्समयद्दक्षिणा वकैरप्येवमांसपरित्यागात्सवकं पंचकमिति प्र
सिद्धं मांसभक्षणं निषिद्धमिति गौडनिवंधः अस्मिन् सकलपक्षे च मांस
परित्यागः प्रशस्तः महाभारते कौमुदे शुक्लपक्षे योऽन्नदानं करोत्युत सस
तरति दुर्गाणि प्रेत्य चानन्त्यमश्नुते तथा कौमुदे तु विशेषाणि शुक्लपक्षेन
एविप वर्जयेत्सर्वमांसानि धर्मो हि अत्र विधीयते सकलकार्तिकमासम ४०

अथ कार्तिकशुक्लनवम्यां मासचतुष्टयावच्छिन्न विधिवच्चंडिकापूजनजन्यफल
समफलप्राप्तिकामः चंडिकापूजनमहं करिष्ये इति संकल्प. ॐ चंडिके इहाग
च्छ इह तिष्ठ स्वाहा ॐ चंडिकायै नमः एवं प्रकारेण पंचोपचारैः पूजा अथाने
कादश्यां पुष्पहारोत्ते एकादश्यां तु शुक्लायां कार्तिके मासि केशवं सुप्तं प्रबोध
येद्रात्रौ श्रद्धाभक्तिसमन्वितः अत्र ब्रह्मेंद्ररुद्रैरित्यादि श्लोकद्वयं वाराहपु
राणे द्वादशी पूजा कथितमत्र पठितव्यमिति समाचारः कल्पेनैवं तत्सम
माचरेत् तत्र प्रकारः प्रांगणे रात्रौ विष्णुं संपूज्य मन्त्रमेनं पठेत् ॐ ब्रह्में
द्ररुद्रैरभिपूज्यमानो भवानृषिर्वंदितवंदनीयः प्राप्ता किलेयं तव कौमुदा
ख्या जागृष्व जागृष्व च लोकनाथ १ ॐ उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां ज
ॐ मेघा गता निर्मलपूर्णचंद्र शारद्यपुष्पाणि मनोहराणि अहं ददानीति च पुण्यहेतोर्जागृ
ष्व जागृष्व च लोकनाथ २

स्नानेचदानेचमहापातकनाशनं अरुणोदयवेलायांतस्यांस्नानंमहाफलं अत्रचा
कंपत्रस्थस्थं बदरपत्रस्थस्वकंमूर्ध्निदत्वा यन्मयादुष्कृतंपापंमयासप्तजन्मसुतन्मेरो
गंचशोकंचमाकरीहंतुसप्तमी इतिपठित्वाकर्तव्यं ॐजननीसर्वभूतानांसप्त
मीसप्तसप्तिके सप्तव्याहृतिकेदेविनमस्तेसूर्यमंडले इतिमंत्रेणार्घंदद्यात् अथ
भीष्मतर्पणं अष्टम्यांदेवतर्पणानिवर्त्यतद्विधिनाकुर्यात्त्रयवर्णैः वैयाघ्रप
दगोत्रायसांकृतिप्रवरायच अपुत्रायददाम्येतत्सलिलंभीष्मवर्मणे इतिमंत्रेण
भीष्मंतर्पयेत् तर्पणमेतद्वविधिनासर्ववर्णैःकर्तव्यं इतिसमयप्रदीपः
माघ्यांस्नानंसतिसंभवेअवश्यंकर्तव्यं रामायणे आषाढीकार्तिकीमाघीतिथ
यःतुल्यसंभवः अप्रदानवतांयांतुपश्चाद्येऽनुमतेगताः इतिभरतशपथोऽ
दृष्टेऽधर्मप्रतिपादनात् अथहस्तमहूर्त्तं दशम्येकादशीद्वादशीत्रयो राम॰
४२

ते यत्रकुत्रापि च जले स्नानं कुर्वन् गंगाभास्करे अयुतानि गोसहस्रं प्राप्नोति रूपेस्सुभगत्वमाप्नोति
येषां मनोरथाः सिद्धिं न यान्ति माघमज्जनं दारिद्र्यपापदौर्भाग्यपंकप्रक्षालनाय वै
माघस्नानान्नान्यो हि उपायो नरसत्तम मकरस्थे रवौ यो हि न स्नाति तत्कुदिनं रवौ
कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्रजेत् स्कान्दादिपुराणेषु वाक्यान्येव प्रमाणा-
नि तत्र प्रकारः माघमासे संक्रान्तिक्रमे रात्रप्रथमदिने अरुणोदये पद्मपुराणो-
क्तमाघस्नानजन्यपुण्यप्राप्तिकामोऽस्मिन्माघमासे प्रातःस्नानमहं करि-
ष्ये इति संकल्पः ततो वै स्नानं कर्तव्यं तत्र मकरस्थे रवौ माघे गोविन्दाच्युत मा-
धव स्नानेनानेन मे देव यथोक्तफलदो भव इति गोविन्दनाम ज्ञानेकालेषु उदकोद-
कपरोटकैरपि मा घमासे प्रातःस्नानं तत्र स्नानमपि पुराणे अथ माघ
शुक्लसप्तमी तत्र गौडाः सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी तस्यां

व्र॰प॰ पृथिवी इहागच्छ इह तिष्ठेत्यावाह्य एतानि पाद्यादीनि ॐ पृथिव्यै नमः एवं गंधादिना पूजयेत्
४३ ततः ॐ मेषोऽर्घः पृथिव्यै नमः इति दुग्धेन तत्रैवार्घं दद्यात् ततः ॐ पृथिवि क्षमस्वेति विसर्ज
येत् दधिभक्तं किंचिदाम्रपल्लवे च गर्त्ते निःक्षिपेत् मृत्तिकाभिः गर्त्तं पूरयेत् ततोऽग्रे प्रद॰
क्षिणां दद्यात् अद्य कृतैतद्धलप्रवृत्तकर्मप्रतिष्ठार्थं हिरण्यमग्निदैवतं यथानामगोत्रा
येत्यादि ततो हलेनेष्टो वृषभो नवनीतेन मुखपार्श्वयोश्चालिविनायोक्तव्यो हलाग्रे
कनकयोगः कर्तव्यः भग्नशृंगभग्नखुरछिन्नलांगूलकपिलवृषभा न योक्तव्याः हल
वाहकाः समर्थाः कर्त्तव्याः हलानि दृढानि कर्तव्यानि वृषभयुग्मादिकं न शुभदं वृषभा
नां नर्दनेन चतुर्गुणं सस्यं भवति एका जयकरी रेखा तृतीया चार्थसिद्धिदा पंचमी या भवे राम
द्रावा बहुसस्यफलादिका अतः ऊर्ध्वं न गंतव्यं महादोषस्ततो भवेत् किंचिदन्नशराव ४३
द्वये कृत्वा शालायां बध्नातीति समाचारः अथ फाल्गुनमासस्य कृत्यं फाल्गुनकृष्णव

दशोत्तरनमीषु प्रतिपत्सु पौर्णिमासे च विहितनिषिद्धा रविबुधबृहस्पतिचंद्रशुक्रवारे
षु उत्तरात्रयरेवतीश्रवणमघानुराधामूलाश्विनीरोहिणीहस्तपुष्यपुनर्वसुमृगशि
रःस्वातीविशाखाकृत्तिकाशतभिषाज्येष्ठासु वृषमिथुनकन्यामीनलग्नेषु वरमा
रभ्यकुलीनदिने द्विवेंगतात्सर्वेषां वरपुंगधरः कृतस्नानादिरभ्वं ततः गर्ते स्वस्तिवाज
लेनार्घ्यं तत्रजले गत्रजले ॐ प्रजापते इहागच्छ इहतिष्ठ स्वाहा एतानि पाद्या
र्घाचमनीयस्नानीयपुनराचमनीयानि ॐ प्रजापतयेनमः इदमनुलेपनं ॐ प्र
जापतयेनमः ततः पुष्पेण ॐ प्रजापतयेनमः इतिवारत्रयंपूजयेत् एतानिगं
धादीनि प्रजापतयेनमः ॐ प्रजापते क्षमस्वेति विसर्जयेत् नवग्रहा इहागच्छ
त इहतिष्ठत स्वाहा एतानि पाद्यादीनि ॐ नवग्रहेभ्योनमः एवं गंधादिना
पूजयेत् नवग्रहाः क्षमध्वमिति विसर्जयेत् हलपूजां पराशरपूजांच ॐ र

तुर्दश्यां शिवव्रतं अतीतायां तु माघ्यां वै मासात्कृष्णचतुर्दशी । शिवं तु पूजयेत्तत्र रात्रौ कुर्याच्च जागरं भू
तेश्वरादिरूपेणोक्तेन पूजनीयो नैवाश्वमेधसहस्रैः क्रतुराशिलोके गंगातमं च भुवने न हि तीर्थमस्ति
नान्यद्व्रतं हि शिवरात्रिसमं च लोके अत्रग्रंथकथितफलेन संकल्पवाक्यं फाल्गुनकृष्णचतुर्द
श्यां प्रातःकाले कृत स्नानादिराचांतः पूर्ववत्ताम्रपात्रमादाय ॐ भगवन्नद्य भगवत्पादेवताऽ
द्यादि चतुर्दशवर्षाणि यावत् शिवरात्रिव्रतमाचरिष्यामीति निवेद्य भूतकालिकशिवानु
चरत्वा शिवलोकमहितत्वदेवसाहित्यसुरालयभ्रमणभूपालत्वसार्वदिक्कशिवभक्ति
पवृद्धिमहितत्वलक्ष्मीगोधनपुत्रायुर्विद्याधनयशःकामः इत्यादि चतुर्दशवर्षाणि याव
च्छिवरात्रिव्रतमहं करिष्ये पूजाप्रकारपूजार्थं ग्रंथ एवास्ति अथ संक्रांतिकृत्यं संक्रांतिकृ
त्ये देवीपुराणे एकधापि कृतेनात्मिन् कोटिकोटिगुणं भवेत् धर्मादिवर्धते ह्यायुः राज्य
पुत्रसुखादयः अधर्माघाधिशोकादि विषवच्चाग्निसन्निधौ विषवेष्वयनाशं दत्तं भवति

ग्र॰प॰ चादायं एवंविष्णुपदे चैवं षडशीतमुखे तथा संक्रान्तिनामानि यथाक्रमं अयनविष्णुपदीषडशी
४८ तयोर्विषुवद्विष्णुपदीषडशीतयः रविसंक्रमणेपुण्येनस्नायाद्यस्तुमानवः सप्तजन्मान्यरोगीद
रिद्रश्चोपजायते अथ पुण्यकालव्यवस्था तत्र शातातपः अर्वाक्षोडशविज्ञेयानाड्यः
पश्चाच्चषोडश कालः पुण्योऽर्कसंक्रान्तेर्विद्वद्भिः परिकीर्त्तितः देवीपुराणे षडशीतमु
खेतीते वृत्ते च विषुवद्वये, भविष्यत्ययने पुण्यमतीते चोत्तरायणे अयने दक्षिणायने इत्यर्थः
उत्तरायणविशेषोपपादनात् अत्र देवीपुराणवाक्येन संक्रान्तिविशेषे पुण्यकालविशेषक
थनात् शातातपवाक्यमश्रुतविशेषविष्णुपदीमात्रे वतिष्ठते एषा च व्यवस्था दिनसंक्रा
न्तिषु रात्रिसंक्रान्तिषु देवीपुराणे मानर्द्धभास्करे पुण्यमपूर्णे शर्वरीदले संपूर्णे तूभयोर्दयम
तिरेके परेहनि मानार्द्ध दिनार्द्ध भास्करे निरंशके इति विशेषः उभयोर्दिनार्द्धयोर्व्यतिरेकेऽर्द्ध
रात्रव्यतिरेके तूदयमर्थः अपूर्णे रात्र्यर्द्धे यदि संक्रान्तिस्तदा पूर्वदिनोत्तरार्द्धं पुण्यं पूर्णेरा राम॰ ४८

अश्वत्थाम्नेनमः इदमनुलेपनं ॐ अश्वत्थाम्नेनमः ततः पुष्पैः ॐ अश्वत्थाम्नेनमः इति
त्रिः पूजयेत् एतानिगंधपुष्पधूपदीपनैवेद्यानि ॐ अश्वत्थाम्नेनमः ॐ अश्वत्थामन्नु
ज्ञायस्वेति विसर्जयेत् एवं बलिव्यासहनुमत्कृपपरशुरामविभीषणाः पूजनीयाः
ॐ जन्मवत्स इहागच्छ इहातिष्ठ इत्यावाह्य एतानिपाद्यादीति ॐ जन्मनक्षत्रायनमः ए
वं पुष्पगंधादिनार्चयेत् विसर्जयेच्च एवं प्रजापतिः पूज्या ॐ मार्कंडेय इहागच्छ इ
हातिष्ठ इत्यावाह्य एतानिपाद्यादीनि ॐ मार्कंडेयायनमः एवं गंधादिनार्चयेत्
इदं वस्त्रं ॐ मार्कंडेयायनमः ततो वरप्रार्थना ॐ मार्कंडेय महाभाग सप्तकल्पांत
जीविन चिरंजीवी यथा त्वं भो भविष्यामि तथा मुने सतिलमधुरदुग्धपाने तथामं
त्रः सतिलं गुडसंमिश्रमंजल्यर्द्धमितं पयः मार्कंडेयवरं लब्ध्वा पिवाम्यायुष्यहेतवे
अत्रामिषवर्ज्जं ब्रह्मचर्यंच कर्त्तव्यं ब्रह्मचर्यं चाष्टविधमैथुननिवृत्तिः तथाच स्म

र्द्धं यदि संक्रान्तिस्तदा पूर्वेद्दिनस्योत्तरार्द्धं मध्यमदिनस्य पूर्वार्द्धे दिने पुण्यं अर्द्धरात्रोपरि संक्रा
न्तौ उत्तरदिनपूर्वार्द्धमेव पुण्यमिति यदा च पूर्वेद्युर्निसंक्रान्तिकाले च एकैव तिथिर्भवति त
दा पूर्वदिनोत्तरार्द्धमेव पुण्यं यदा तु न तथैव आहोपुण्यं विज्ञानीयाद्यदा भिन्नातिथिर्भ
वेत् एवमेव समयप्रदीपः तथैव ज्योतिःशास्त्रे निरंशको यदा भानुः पूर्वापरदिने ह
यं पूजयेत्तदा सर्वं पूर्वमपरं पुण्यवर्जितं भुजबलभीमे अर्द्धरात्रे चकालान्तेन यदा संक्र
मते रविः तदहः पुण्यमित्युक्तं गर्गगालवगौतमाः अथ जन्मदिनकृत्यं तत्र तिलै
रुद्वर्त्य तिलैरेव स्नात्वा शुक्लाम्बरयुगं परिधाय आचान्तो गृहे उपविश्य अश्वत्थामा
बलिर्व्यासो हनुमांश्च विभीषणः कृपः परशुरामश्च जन्मन्येव च प्रजापतिमार्कण्डे
यान् पूजयेत् तत्क्रमः ताम्रपात्रस्थजले ओं अश्वत्थामन्निहागच्छ इहातिष्ठेत्या
वाह्य एतानि पाद्यार्घ्याचमनीयपुनराचमनीयस्नानीयपुनराचमनीयानि ओं अ

मनीयस्त्वानीयपुनराचमनीयानि इदमनुलेपनं ॐ गणपतये नमः ततः पुष्पाणि
गणपतये न इति त्रिः पूजयेत् एतानि गंधपुष्पधूपदीपताम्बूलनैवेद्यानि ॐ गण
पतये नमः एवं एतानि गौर्य्यै नमः ॐ पद्मायै नमः ॐ शच्यै नमः ॐ मेधायै नमः
ॐ सावित्र्यै नमः ॐ विजयायै नमः ॐ जयायै नमः ॐ देवसेनायै नमः ॐ स्व
स्वधायै नमः धायै नमः ॐ मातृभ्यो नमः ॐ लोकमातृभ्यो नमः ॐ हृष्ट्यै ॐ पुष्ट्यै ॐ तुष्ट्यै
ॐ आत्मकुलदेवतायै इति चतुर्थ्यन्तनाम्नानमोन्तेन पाद्यानि धूपदीपनैवेद्या
नि च दद्यात् ॐ गणपतिसहितषोडशमातरः क्षमध्वमिति विसर्जयेत् ततः ॐ
षष्ठिके इहागच्छ इहातिष्ठ स्वाहा एतानि पाद्यादीनि ॐ षष्ठिकायै नमः इदम
नुलेपनं ॐ षष्ठिकायै नमः पुष्पैः ॐ गौर्य्यै पुत्रो यथा स्कंदः शिशुः संरक्षि
तस्त्वया तथा ममाप्ययं बालो रक्षतां षष्ठिके नमः ॐ षष्ठिकायै नमः इति त्रिः

गुणकीर्त्तनं केलिः ॥ देवतागुरुसमाश्रयणं संकल्पोऽथ यथामयस्य क्रियानिर्वृत्तिरेव च स्वा
मिधर्मेणैव जन्मान्तरीयश्रोत्रियत्वेफलं स्त्रीपरित्यागोऽथ वृद्धिः ॥ जीवनमत्स्यजल
प्रवेशनेन ब्राह्मणाय दानेन चायुर्वृद्धिः ॥ खंडनं नखकेशानां मैथुनाध्वानमेव च स्वा
मिषं सकलं हिंसा वर्षवृद्धौ विवर्जयेत् ॥ वर्षवृद्धौ वर्षदिने तिलोद्वर्त्ती तिलस्ना
यी तिलहोता तिलप्रदः ॥ तिलभक्षी तिलावापी षट्तिली नावसीदति ॥ इति ज
न्मदिनकृत्यं ॥ अथ च तत्रैव षष्ठदिने रात्रौ षष्ठिकापूजा तत्र कृतस्नानादिक्रि
यातः प्रदोषसमये सूतिकागृहे गणपतिसहिताः षोडशमातॄः पूजयेत् तत्र
क्रमः पीठे भित्त्यादौ वा ॐ गणपते इहागच्छ इह तिष्ठ इत्यावाह्य एवं गौरी पद्मा श
ची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः
पुष्टिः तथा तुष्टिरात्मकुलदेवता इति प्रत्येकमावाह्य एतान्पाद्यार्घ्यैश्च

व्र॰प॰
४६

भद्राविमर्श्वानि: ... मनाद ... नाभ्यंगमर्दं नभूमिपुत्रे सौरेश्च शुक्रे च कुजे च मांसं बुधे बुधो

सोमात्यजौ वनस्पतिगते सोमे हान्तु हाथस्तु वा दयेत्। नाभ्यंतिपितरस्तस्य दशवर्षाणि विस्तरि वर्ज्ज

पंच च अत्र दधिमंथने गवां च दधिमंथने गवां च ह्रासोभावो भवति अथ नक्षत्रकृत्यानि नीयाः ४

ला॰ वामनपुराणे नंदास्तु नाभ्यंगमुपाचरेत् सौरे च रिक्तासु जयासु मांसं पूर्णासु योषि

त्परिवर्जनीयां श्रोत्रेषु सर्वेषु च देवकुर्यात् चित्रासु हस्ते श्रवणे च तैलं क्षौरं विशा

खाप्रतिपत्सु वर्ज्यं मूले मृगे भाद्रपदे च मांसं योषिन्मघाहानिलयो ज्वराणि अ

त्रप्रकरणे अभ्यंगतैलप्रकरणे निषिद्धः भाद्रपदे च पूर्वामाद्रा मितिग्रामणिकाः

प्रतिपद्दर्शषष्ठीषु नवम्यां चैव सत्तमाः दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलं मं

दे भौमे श्राद्धे कुहू षष्ठी निरंशके वस्त्राणां क्षारसंयोगो दहत्यासप्तमं कुलम्

आदित्य सौरेषु रत्नेषु सुतं घाणि प्रक्षालनापरजकस्य नवस्त्रदानं संक्रांतिके

रभरवरगणपराणारा या पुंसां भवंति विपदः सपुत्रपौत्रैः अथावश्यश्राद्धकालाः ४६

षाभावः पक्वतिलतैलेपि दोषाभावोपि वैरुक्तकारात् पैठीनसिः नपर्वसुतैलंद्दुरंभ
ंगंमांसमितुपेयात् उपेयाद्दुपभंजीति तत्वार्थः बौधायनः पर्वसुनाधीयान्नमांसमश्नी
यान्नस्त्रियमुपेयात् महाभारते वर्जयेद्दन्तकाष्ठानि वर्जनीयानि नित्यशः मद
येच्छाखदन्तकाष्ठानि पर्वस्वपि विवर्जयेत् पैठीनसिः नामावास्यायां हरितानिच्छि
द्यात् विष्णुपुराणे छिनत्ति वीरुधं यस्तु वीरुत्संस्थे निशाकरे पत्रं वा पातयेत्ते
वं ब्रह्महत्यां स विंदति वीरुत्संस्थे वनस्पतिरित्यर्थः अमावास्यायां चन्द्रो वनस्पति
गतो भवति अत्र दोषाभावमाह कुशान्काष्ठांश्च पुष्पं च गवार्थे तृणानि च ई
दृद्वये न दुष्यंति होमार्थे स्मृति धर्मतथा कुशासंपादनाद्युचितं विना काष्ठाम
पि तादृशं दूर्जार्थं पत्रं च ईदृद्वये अमावास्यायां न दुष्यति छिन्ने तु तेषु न दूष
णं भवतीत्यर्थः तथा अमावास्यायां न नाद्दये हलीवर्दान् तथाऽऽथर्ववेदे

अमावास्यानि चैत्रे तु कामाधीश्रावणीमाग्रहायणीम् रहुसंतयोरपरपक्षे दं चतुर्द
पूर्णिमावर्जं गजच्छायायोगे मघायां च पदत्रयोदशीयोगः कुंजरच्छायासंज्ञकः भवेन्मघायां
संस्थश्च प्राक्सितिनां केंकेरस्थिते रवौ हस्ते तिथिस्तु त्रयोदशी पूर्णा मघान्वितेंदुभवति तत्
दूगजच्छाया भवतीत्यर्थः नवान्नभक्षणं तीर्थप्राप्तिं चंद्रसूर्यग्रहणं चैव तु पुण्या
द्रुमावग्र्यकं ग्रहणे ग्रहणे स्नानं दानं तपः श्राद्धमनंतं राहुदर्शने राहुदर्शनाद
त्तं हि श्राद्धमाचंद्रतारकं गुणावत्सर्वकामीयं पितॄणामुपतिष्ठति शातातपः
सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने अकुर्वाणस्तु तच्छ्राद्धं पंके गौरिव सी
दति देवलः राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु स्नानदानादिकं कुर्या
न्निशि काम्यव्रतेषु च अत्ययो बंधुविनाशः वृद्धिः पुत्रजन्मादि एतेन नि
षिद्धकालानां आदि क्रमपलक्षणं जावालिः संक्रांतः पुण्यकालस्तु षो

उक्तोभयतः कलाः चंद्रसूर्योपरागे तु यावद्दर्शनगोचरं अत्र दर्शनपदं चाक्षुषस्ना
नपरं गोचरपदं चादृष्टस्नानविषयत्वयोग्यावस्थालक्षणपरं तेन चंद्रसूर्योपरागेणाव
च्छिन्नादृष्टस्नानविषयत्वयोग्यावस्थावान्भवति तावत्पुण्यकालेत्यर्थः एवं च स्वयन
दृष्टोपरागो दृश्यमानो दुष्टः पुण्यक्रियाहेतुर्भवति दर्शनांतरे मेघादिच्छिन्नोपि नें
पुण्यक्रियाहेतुर्भवति तादृशयोग्यतासत्वात् अस्तमनयोस्तथादिनरात्र्योश्च
चंद्रसूर्ययोरुपरागे न पुण्यकालो भवति यथाविधियोग्यताया अभावादिति ए
तमेव सम्यक्प्रदीपः तथा नास्तगयोर्ग्रहात्पूर्वमङ्कि सायं प्रातर्ग्रहात् यहेका
लेन चास्मिन्नायान्नस्नानास्मिन्नायाश्च महत्वेः मुक्ते भगो निर्भंजो तयहि नस्नानम्
हानिस्या स्नात्वा दृष्ट्वापरेह्न्यस्तं अस्तस्यमितयोस्तयोः महानिशायां चैषार्द्धग्र
हरोपरि सार्द्धप्रहरं यावत् ज्योतिःशास्त्रे अर्द्धरात्राव्यतीते तु परा चंद्रग्रहोभ

तृतीयामायाममीषामयाग: समासम्पमध्ये अमावास्याद्वयं चेत्तदैषामयाग: समासां त:
एवं शुक्लादिमासद्वयं प्रसिद्धं तमतिक्रम्य च रविर्यदि गच्छेत्तदा चेन आद्योमलि
म्लुचो ज्ञेयो द्वितीय: प्राकृत: स्मृत: तथा चतसोमयागाय च तत्तत्काले दर्शे दर्शमति
क्रम्य यदा रवि: संक्रमते तदा मासद्वयं तदाद्यो मलिम्लुच: द्वितीय: प्राकृत: स्य
शी: शुक्लादिरेव तथा अमावास्याद्वयं यत्र रविसंक्रान्तिवर्जितं मलिम्लुच:
स विज्ञेयो ऽनर्ह: सर्वकर्मसु परिशिष्टे मलिम्लुचस्तु मासो वै मलिन: पापसंभव:
गर्हित: पितृदेवेभ्य: सर्वकर्मसु तं त्यजेत् बृहस्पति: नित्यनैमित्तिकं कुर्यात्प्रय
त: सन् मलिम्लुचे तीर्थस्नानं गजच्छाया प्रेतश्राद्धं तथैव च नित्यमहरह: क्रिय
माणं मन्वादि आवश्यकं पूर्वगृहीतत्कृच्छ्रादिव्रतं नैमित्तिकं पुत्रजन्मचन्द्रोपरागा
दिकं श्राद्धं तीर्थस्नानं प्रथमतीर्थं गत्वा प्रथमं स्नाति तदा दोष एव मलिम्लु

वेल् सायेतत्रनभुंजीत नतुप्रातरभोजनं अत्रचंद्रसूर्य: लोककामनकामनायां य
स्मिन्नहोरात्रेउपरागोद्वृत्तस्मिन्नेवउपवास:कर्त्तव्य: तथाचप्रागुक्तातप: अहोरात्रं
तनाश्नीचंद्रसूर्यग्रहोयदा मुक्तंदृष्ट्वातुभुंजीतयदिनस्यान्महानिशा स्
यांचेद्रुमसोलोकानत्ययान्यातिमानव: धौतपात्माविशुद्धात्मामोदतेतत्रदेवव
त् इतिकामनाश्रवणात् कामनायाअभावे ग्रहणमोक्षानंतरं ग्रहणास्ताभावे
महानिशांविहायस्नात्वाभोक्तव्यं यदाचग्रस्तेग्रहणमोक्षनिश्चयोभवतिमेघा
दिनाचंद्रसूर्यौनदृश्येतेतदाकामनाविरहेनभोजनाभाव: अदृष्टाचानंतरंचं
द्रग्रहेसतिदिनभोजनेदोषोनभवति श्राद्धादिकारिणोभोजननन्यमश्नोचंभ
वत्येव अत्रमलिम्लुच: इंद्राग्नीयत्रहूयेतेमासादि:सप्रकीर्त्तित: अग्नीषो
मोस्मृतोमध्येसमाप्तोपितृसोमको शुक्लप्रतिपदिद्राम्पियाग:समासोद्:

चेत्स्वनावृत्तं तार्थैस्तान्नमपि त्यजेत् अनावृत्तेप्रथमसमित्यर्थः तथा प्रथमं द्वादशेमासि
कुर्यात्सिंडक्रियां बुधैः कश्चित्त्रयोदशेपिस्यादाद्यमुत्क्रान्तवत्सरं इत्यर्थः प्रतिसांवत्स
रिकं श्राद्धं द्वादशेमासि तथाद्यं कर्तव्यं यदितन्मासाभ्यंतरेमलिम्लुचोभवति तदामलि
म्लुच एव द्वादशेमासि श्राद्धं कर्तव्यं तथाच असंक्रांतेपि कर्तव्यमाब्दिकं प्रथमंबुधैः
असंक्रांतेसंक्रांतिरहितमलमासेत्यर्थः यदिचद्वादशान्मासादन्योमास एकादशमा
साभ्यंतरेऽधिकमासोभवति तदापंचदशमासिकानि भवंति त्रयोदशमासे सपिंडनं
यदिसंवत्सराभ्यंतरेऽधिकमासः स्यात्तदामासिकार्थं दिनमेकं वर्धयेदितिवचनात्
एवंमलिम्लुचे उक्तप्रतिपदस्मृतेयस्यां कस्यांचित्तिथौ यान्ति यतेतस्यापि पंचदश
मासिकानि भवंति तथा गर्भेवार्द्धुषे कृत्ये च मृतानां मृतानां पिंडकर्म च सपिंडीक
रणं चैव नाधिमासं विदुर्बुधाः निषिद्धमिति शेषः गर्भेगर्भाधानकर्मणि वार्द्धुषु

कृते त्वरणे दर्शनादिके मृतानां पिण्डकर्मसु नियतकालादन्याहिकप्रेत कार्येषु सपिण्डकरणे
च मलमासदोषाभावः तथा सपिण्डीकरणादूर्ध्वं यत्किंचिच्छ्राद्धिकं भवेत् दृष्टं वाऽथवा
पूर्णं तन्न कुर्यान्मलिम्लुचे अत्रापि प्रथमाब्द व्यतिरिक्ते निषेधः ज्योतिःशास्त्रे यत्कर्म
णोऽपच्छ्राद्धं नवश्राद्धं तथैव च प्रतिसंवत्सरं श्राद्धमशौचात्पतितं च यत् नवश्राद्धे
तु श्राद्धमशौचाद्युपलक्षितं तेनाशौचादि सांवत्सरिकश्राद्धं यन्नियतकाले कृतं नस्या
त्तदशौचाद्यपगमे मलिम्लुचेऽप्यागते कुर्यात् अत्र च सांवत्सरिकश्राद्धे चान्द्र एव मा
सः प्रयोजकः तदाह चक्रवत्परिवर्तेत सूर्यकालवशाद्यतः अतः संवत्सरं श्राद्धं कर्त
व्यं मासचिह्निते मासचिह्नतः कर्तव्यं पौषमाघाद्यमेव च अत्रेच्चक्रवदित्यादिना सौ
रमासं निराकृत्य पौषमाघादिमासैश्चैव गणाकर्तव्यताबाध्याच्चान्द्रमासमाह ः चान्द्रमा
सश्चोत्सर्गिकः अस्मादिः ततः अलज्जकर्मणापन्नासीयपरा स्त्रीयतिप्रौयोऽभियते

ए.अ
५२

ब्रा॰ प॰
५३

कं दुर्यं च इति भवति पंचदशमासिकानि भवंति नचैवमाद्ये मलमासे कृष्णपक्षे मृतस्य च

तुर्दशमासिकानि नार्हत्येकस्तु समयान्नाभावादिति संवत्सरेनाभ्यंतरे यद्यधिकमासपातो भव

ति तदा मासिकार्थं दिनेम कं वर्द्धयेदिति निर्णयवाक्ये संकोचात् मलमासाहृत्वैकमत्वात् प्रेता

वत्वहानेश्च अपि तु प्रथमवर्षे द्वादशमासिकानि मलिम्लुचं तथा तत्रैवश्राद्धं कर्त्तव्यं तदपि शुक्ला

दिपरिग्रहेणैव संगच्छते तथाहि अतः संवत्सरश्राद्धे कर्त्तव्यं मासचिह्नितमिति द्वा

दशमासविहितानां वर्षाधिता तत्र ज्येष्ठकृष्णपक्षे मृते वैशाखकृष्णपक्ष एवेति मलि

म्लुचकृष्णपक्षे श्राद्धकरणे कस्मादिरीत्या मासविहितत्वबाधः स्यात् शुक्लादिरीत्या ज्ये

ष्ठकृष्णपक्षेपि वैशाखकृष्णपक्ष एवेति न भवति मासविहितत्वबाधस्तस्माच्छुक्लादिरेव

मासः श्राद्धे प्रयोजकः तेन मलमासकृष्णपक्षे मृतस्यापि पंचदशमासिकविधानं सक

लशिष्टसंमतं संगच्छते शुक्लादिक्रमेणैव यस्य मलमासस्य यस्मिन्पक्षे मृतस्त ॥ रामः

५३

वर्षान्तरेपि शुक्लादितन्मासीयतत्संख्यातिथौ तच्छ्राद्धं कर्त्तव्यं एवं च मलमासेपि यो म्रि-
यते तस्यापि शुक्लादिचान्द्रमासगणनया तन्मासीयतत्संख्याया तिथिर्भवति मरणतज्जा-
तीयायामेव तिथौ वर्षान्तरे श्राद्धं कर्त्तव्यं एवं च वैशाखे मलमासे तत्र कृष्णपक्षे म्रियते
तस्याग्रिमवर्षे शुक्लादि वैशाखकृष्णपक्षे एव श्राद्धमायाति स च यद्यपि कृष्णादिमास-
रीत्या कृष्णपक्षे कृष्णपक्षे तथापि शुक्लादि श्राद्धं परिग्राह्यम् तस्य च शुक्लादिक्रमेण वै-
शाखशुक्लपक्षत्वमेवेति तत्रैव श्राद्धं शुक्लादिमासपरिग्रहे च मलमासकृष्णपक्षस्य त-
स्यैव च दर्शमासिकानि संपद्यन्ते अन्यथा वैशाखस्य मलमासस्य कृष्णपक्षे दर्शमासीयस्य
लि तथापि तस्य वैशाखदर्शमासस्य वर्षेणाग्रद्दशैव कृष्णदर्शमास्यः प्राप्ताः इति अत्र त्रयो-
दश मासिकियन्तां मासके विमरणतिथिसजातीयतिथिरेव परिग्राह्या शुक्लादिप-
रिग्रहे शुक्लादिदर्शमासस्य त्रयोदशो भवति तेन त्रयोदशमासानि ४ एमाहि
कं

क्लादिक्रमेण तत्रामुकस्मैवमासस्य तस्मिन्पक्षे श्राद्धं कर्त्तव्यं तेनवैष्णवस्मलमासक्र
मपदेश तत्वस्य शुक्लादिक्रमेण वैष्णवमासस्य प्रदेशे श्राद्धं कर्त्तव्यमिति यत्तस्मन्व
संकल्पवाक्ये भाद्रकृष्णादिमेवाभिलपंतिकृष्णादि रूपमासइति कृत्वा न विरुध्यते वस्
तस्य तत्रापि शुक्लादिरेवाभिलाप: कर्त्तुमर्हति ततोपि कृष्णादित्वश्राद्धप्रयोगकत्वा
दिति एषश्रीमद्भागवतरत्नोन्नीत: समयप्रदीपाद्यनुसारी पंथा: ॐ इतिश्रीमहो
पाध्यायश्रीरुद्रधरविरचिता व्रतपद्धति: समाप्ता शुभंभूयात्सर्वजगताम् ॥
शुभमस्तु लेखकपाठकयो: ॥ नम:श्रीकमलदलविपुलनयनाभिरामायपरमात्मने
गुरुचरणकमलेभ्योनम: पार्वती